पुस्तक - वितरण की तिथि नीचे अंकित है इस तिथि सहित 30वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए । अन्यथा 10 पैसे प्रतिदिन के हिसाब से बिलम्ब - दण्ड लगेगा ।

February 1919.

THE

CHOWKHAMBA SANSKRIT SERIES;

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 254.

क्रमदीपिका ।

श्रीमन्महामहोपाध्यायकाश्मीरिक

केशवभट्टविरचिता ।

विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेता । तथा

लघुस्तवराजस्तोत्रम् ।

श्रीमद्भगवदाचार्यश्रीश्रीनिवासाचार्यविरचितम् ।

[illegible] जीवन [illegible] पुरुषोत्तमप्रसादप्रणीत

गुरुभक्तिमन्दाकिन्याख्यव्याख्या समलंकृतम् ।

श्रीयुत [illegible] साहित्य [illegible]

[illegible] संशोधितौ ।

KRAMADIPIKA,

By Mahamahopadhyaya Kasmirika Kesav Bhatta.

WITH A COMMENTARY BY Sri Govind Bhattacharya.

and LAGHUSTAVARAJASTOTRAM

By Sri Niwasacharya.

With a commentary "Gurubhakti Mandakini"

By Purushottam Prasada.

FASCICULUS III.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI BOMBAY:

PROBSTHAIN & CO: BOOKSELLERS, LONDON.

Printed by Jai Krishna Das Gupta

at the Vidya Vilas Press,

Benares.

Price Rupee one.

॥ श्रीः ॥

—:०:—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा–संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२५४

१ अस्यां चौखम्बा–संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्त्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते । एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

२ प्राचीना दुर्लभाश्चामुद्रिता मीमांसावेदान्तादिदर्शनव्याकरणधर्मशास्त्रसाहित्यपुराणादिग्रन्था

३ एताऽत्र सुपरिष्कृत्य मुद्र्यन्ते ।
काशिकराजकीयप्रधानसंस्कृतपाठशालाऽध्यापकाः पण्डिता अन्ये च शास्त्रदृष्टयो विद्वांस एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

४ भारतवर्षीयैः,ब्रह्मदेशीयैः,सिंहलद्वीपवासिभिश्चैतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम्–मुद्राः ७ आनकाः

५ अन्यैर्देयं प्रतिस्तबकं ... ... " " १ " ०

६ प्रापणव्ययः पृथग् नास्ति । ... ...

साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता खण्ड ३
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः १२
(३) श्लोकवार्त्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृतन्यायरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । १०
(४) भाष्यदीपसहितं तत्त्वत्रयम् । विशिष्टाद्वैतदर्शनप्रकरणम् । श्रीमल्लोकाचार्यप्रणीतम् । श्रीनारायणतीर्थविरचितभाट्टभाषाप्रकाशसहितं सम्पूर्णम् (वेदान्तः) ३
(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः ३
(६) भाट्टचिन्तामणिः । महामहोपाध्यायश्रीगागाभट्टविरचिता । तर्कपादः(मीमांसा) २
(७) न्यायरत्नमाला श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णः (मीमांसा) २
(८) ब्रह्मसूत्रभाष्यम् बादरायणप्रणीतवेदान्तसूत्रस्य यतीन्द्रश्रीमद्विज्ञानभिक्षुकृतव्याख्यानम् । सम्पूर्णः । (वेदान्तः) ६
(९) स्याद्वादमञ्जरीमल्लिषेणनिर्मिता सम्पूर्णा २
(१०) सिद्धित्रयम्–विशिष्टाद्वैतब्रह्मनिरूपणपरम् श्रीभाष्यकृतां परमगुरुभिः श्री ६ श्रीयामुनमुनिभिर्विरचितम् । सम्पूर्ण(वेदान्तः)१
(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः । आचार्यचित्सुखमुनिविरचितव्याख्यापेतः (वेदान्तः) ४
(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्तिविस्तृतविचाररूपः म० म० श्रीगिरिधरोपाध्यायविरचितः सम्पूर्णः (न्यायः) ५
(१३) विधिरसायनम् । श्रीअप्पयदीक्षितकृतम् सम्पूर्णम् (मीमांसा) २
(१४) न्यायसुधा (तन्त्रवार्त्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) १६

मध्येऽर्चयेद्धरिं दिक्षु विदिक्ष्वङ्गानि च क्रमात् ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नश्चाऽनिरुद्धकः ॥ १२५ ॥
रुक्मिणी सत्यभामा च लक्ष्मणा जाम्बवन्त्यपि ॥
दिग्विदिक्ष्वर्चयेदेतान् इन्द्रवज्रादिकान् बहिः ॥१२६॥

पद्ममध्ये हरिं पूजयेत् पूर्वादिदिक्केशरेषु हृदाद्यङ्गचतुष्टयम् आग्नेयादिविदिक्केशरेषु अस्त्रमङ्गं पूजयेत् ।

वासुदेव इति—

पूर्वादिदिक्पत्रेषु वासुदेवादीन् पूजयेत् आग्नेयादिविदिक्पत्रेषु रुक्मिण्याद्याः पूजयेत् तद्बाह्ये स्वस्वदिक्षु इन्द्रादीन् तदनु वज्रादीन् पूजयेदित्यर्थः ॥ १२५ ॥ १२६ ॥

फलमाह—

योऽमुं मन्त्रं जपेन्नित्यं विधिनेत्यर्चयेद्धरिम् ॥
स सर्वसम्पत्संपूर्णो नित्यं शुद्धं पदं व्रजेत् ॥ १२७ ॥

योऽमुमिति—

यःपुमान् उक्तविधिना हरिमर्चयेत् अमुं मन्त्रं जपेत् स सर्वैश्वर्यसम्पन्नः सन्नित्यमविनाशि शुद्धम् अविद्यातत्कार्यरहितं पदं ब्रह्माख्यं प्राप्नोति ॥ १२७ ॥

मन्त्रान्तरमाह—

तारश्रीशक्तिमारान्ते श्रीकृष्णायपदं वदेत् ।
श्रीगोविन्दाय तस्योर्द्ध्वे श्रीगोपीजन इत्यपि ॥१२८॥
वल्लभाय ततस्त्रिः श्रीः सिद्धगोपालको मनुः ॥
माधवीमण्डपासीनौ गरुडेना ऽभिपालितौ ॥ १२९ ॥
दिव्यक्रीडासुनिरतौ रामकृष्णौ स्मरन् जपेत् ॥
चक्री वसुस्वरयुतः सर्ग्येकार्णो मनुर्मतः ॥ १३० ॥

तारेति ।

तारः प्रणवः श्रीः श्रीबीजं शक्तिबीजंकामबीजान्ते श्रीकृष्णायेति

स्वरूपंतदनु श्रीगोविन्दायेति स्वरूपं तदनु श्रीगोपीजनवल्लभायेति स्वरूपं श्रीवीजत्रयमितिसिद्धिगोपालकोमन्त्रउद्धृतः ॥

ध्यानमाह—

माधवीति ।

रामकृष्णौस्मरन् जपेत् कीदृशौ माधवीलतामण्डपसमुपस्थितौतथागरुडेनसेवितौ ॥

एकाक्षरादिगोपालमन्त्रान् दर्शयेति ।

चक्रीति ।

ककारोवसुस्वरः अष्टमस्वरः ऋकारस्तेनसहित इति लघुदीपिकाकारः मुनिस्वरः सप्तमस्वरस्तेनसहित इति रुद्रधरः सर्गोविसर्गसहितः इत्येकाक्षरोमन्त्रः ॥ १२८ ॥ १२९ ॥ १३० ॥

कृष्णेति स्वरूपं द्व्यक्षरोमन्त्रः स एवद्व्यक्षरः कामवीजपूर्वश्चेत् तदात्र्यक्षरो मन्त्रोभवति—

कृष्णेति द्व्यक्षरः कामपूर्वस्त्र्यर्णः स एव तु
स एव चतुरर्णः स्यात् ङेऽन्तोऽन्यश्चतुरक्षरः ॥ १३१ ॥
वक्ष्यते पञ्चवर्णः स्यात्कृष्णायनम इत्यपि
कृष्णायेतिस्मरद्वन्द्वमध्ये पञ्चाक्षरो ऽपरः ॥ १३२ ॥

स एवत्र्यक्षरः चतुर्थीविभक्त्यन्तश्चेत्तदाचतुरक्षरो मन्त्रः अन्यः चतुरक्षरः सद्यफलप्रदम् इत्यनेनाग्रेवक्ष्यते कृष्णायनम इति पञ्चाक्षरः कृष्णायेति स्वरूपं स्मरद्वन्द्वकामवीजद्वयस्य मध्येयदाभवति तदा अपरःपञ्चाक्षरोमन्त्रोभवति ॥ १३१ ॥ १३२ ॥

गोपालायेति स्वरूपं वन्हिजाया स्वाहेति पदद्वयेनषडक्षरःकथितः

गोपालायाऽग्निजायान्तः षडक्षर उदाहृतः
कृष्णायकामवीजाढ्यो वह्निजायान्तकोऽपरः ॥१३३॥
षडक्षरः प्रागुदितः कृष्ण गोविन्दकौ पुनः
चतुर्थ्यन्तौ सप्तवर्णः सप्तार्णोऽन्यः पुरोदितः ॥१३४॥

कामवीजसहितकृष्णायेति स्वाहेति पदद्वयेन च षडक्षरोमन्त्र उद्धृतस्तथाऽपरः षडक्षरः प्रागेवकथितः सचक्लींकृष्णायनमइति

कृष्णगोविन्दकौशब्दौयदिचतुर्थ्यन्तौभवतस्तदासप्ताक्षरोमन्त्रोऽपरः सप्ताक्षरः प्रागुदितः सचगोवल्लभायस्वाहेति ॥ १३३ ॥ १३४ ॥

श्रीशक्तिमारः कृष्णाय मारः सप्ताक्षरो ऽपरः ॥
कृष्णगोविन्दकौ ङेऽन्तौ स्मराढ्यावष्टवर्णकः ॥१३५॥

श्रीशक्तिमाराः श्रीभुवनेश्वरीमारवीजानिकृष्णायेतिमारान्तोऽपरः सप्ताक्षरोमन्त्रः कृष्णगोविन्दशब्दौङेऽन्तौचतुर्थ्यन्तौ कीदृशौ कामवीजाढ्यौ इति वसुवर्णः अष्टाक्षरोमन्त्रः ॥ १३५ ॥

दधीति—

दधिभक्षणङेवन्हिजायाभिरपरोऽष्टकः ॥
सुप्रसन्नात्मने प्रोक्ता नम इत्यपरोऽष्टकः ॥ १३६ ॥

चतुर्थ्यन्तोदधिभक्षणशब्दः वह्निजायास्वाहा एतैर्वर्णैरपरोऽष्टाक्षरोमन्त्रः सुप्रसन्नात्मनेस्वरूपमुक्तानम इति वदेत् इत्यपरोऽष्टाक्षरोमन्त्रः ॥ १३६ ॥

प्राक् प्रोक्तो मूलमन्त्रश्च नवार्णः स्मरसंयुतः ॥
कृष्णगोविन्दकौ ङेऽन्तौ नमोऽन्तोऽन्यो नवार्णकः॥१३७॥

प्रागुक्तश्चाष्टाक्षरोमूलमन्त्रः स्मरसंयुतः कामवीजयुक्तः सन् नवाक्षरो भवति सच क्लींगोकुलनाथायनमइति कृष्णगोविन्दकौङेन्तौचतुर्थ्यन्तौस्मरसंयुतौयदि भवतस्तदानवाक्षरोमन्त्रो भवति यद्येतावेवनमोन्तकौनमः शब्दान्तौ भवतस्तदापरोनवाक्षरोमन्त्रः ॥१३७॥

क्लींग्लौंक्लींश्यामलाङ्गाय नमस्तु स्याद्दशार्णकः ॥
शिरोन्तो वालवपुषे क्लीँ कृष्णाय स्मृतो बुधैः ॥
एकादशाक्षरो मन्त्र एतेषां नारदो मुनिः ॥१३८॥
उक्तं छन्दस्तु गायत्री देवता कृष्ण ईरितः ॥
कलाषड्दीर्घकैरङ्गमथा ऽमुं चिन्तयेद्धरिम् ॥१३९॥

क्लींग्लौं क्लींश्यामलाङ्गायनमइति दशवर्णकोमन्त्रः शिरोन्तः

स्वाहान्तः बालवपुषे इति पदं क्लींकृष्णायेति एकादशाक्षरोमन्त्रः बुधैः स्मृतः ॥

उक्तानामृष्यादिकमाह—

एतेषामेकाक्षरमारभ्यैकादशाक्षरपर्यन्तानां द्वाविंशतिमन्त्राणाम् ऋषिर्नारदः गायत्रीछन्दः श्रीकृष्णोदेवता ।

अङ्गान्याह—

कलेति ।

ककारलकाराभ्यां षड्दीर्घकैर्नपुंसकरहितषड्दीर्घस्वरैः क्लाँक्लीं-क्लूँक्लैँक्लौँक्लः एभिरित्यर्थः ॥ १३८ ॥ १३९ ॥

ध्यानमाह—

अव्यादिति ।

अव्याद्व्याकोषनीलाम्बुजरुचिररुणाम्भोजनेत्रोऽम्बुजस्थो
बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको मुकुन्दः ।
दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विश्ववन्द्यो
गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषश्चिरं वः १४०

वोयुष्मान् चिरं बहुकालंमुकुन्दोऽव्यात् रक्षतु कीदृशः व्याकोशं प्रफुल्लँ यन्नीलाम्बुजं तद्वद्दीप्तिर्यस्य स तथा अरुणंरक्तं यदम्भोजंपद्मं तद्वन्नेत्रेयस्य सतथा पद्मोपविष्टः तथा बालः पाञ्चवार्षिकः तथा जङ्घापादयोः संधिः कटीरस्थलंकटी उभयोर्घटितासम्वद्धारणन्तीशब्दायमानाकिङ्किणीक्षुद्रघण्टिकायस्य सतथा हस्ताभ्यां हैयङ्गवीनं सद्योजातं घृतं सुपक्कं पायसंदधत् तथागोगोपाङ्गनागोपालैर्वेष्टितः तथा रुरुःव्याघ्रस्तस्य नखेनविलसन्तीशोभमानाकण्ठभूषाऽलंकारो यस्यसतथा ॥ १४० ॥

एतेषां पुरश्चरणमाह—

ध्यात्वैवमिति ।

ध्यात्वैवमेकमेतेषां लक्षं जप्यान्मनुं ततः ।
सर्पिःसितोपलोपेतैः पायसैरयुतं हुनेत् ॥ १४१ ॥

यथोक्तध्यानं कृत्वाएतेषां मध्येएकं मन्त्रंलक्षंजपेत् तदनुघृत-

खण्डसारयुक्तैः परमान्नै र्दशसहस्रंजुहुयात् ॥ १४१ ॥

तर्पयेत्तावदन्येषां मनूनां हुतसंख्यया ।
तर्पणं विहितं नित्यं योऽर्चयेत्सुसमाहितः ॥१४२॥
वन्ह्यादीशान्तमङ्गानि हृदादिकवचान्तकम् ।
अर्चयेत्पुरतो नेत्रमस्त्रं दिक्षु वहिः पुनः ॥ ॥१४३॥
इन्द्रवज्रादयः पूज्याः सपर्यैषा समीरिता ।
इत्येकमेषां मन्त्राणां भजेद्यो मनुवित्तमः ॥१४४॥
करप्रचेयाः सर्वार्थास्तस्याऽसौ पूज्यते ऽमरैः ॥
सद्यः फलप्रदं मन्त्रं वक्ष्येऽन्यं चतुरक्षरम् ॥ १४५ ॥
स प्रोक्तो मारयुग्मान्तरस्थकृष्णपदेन तु ॥
ऋष्याद्यमङ्गषट्कं च प्रागुक्तं प्रोक्तमस्य तु ॥१४६॥

तदनुतावद्दशसहस्रं तर्पयेत् एवं प्रकारेणैकस्मिन्मन्त्रेसिद्धेजातेतदन्येषां सकृत्पुरश्चरणानाम् एकविंशतिमन्त्राणां जपहोमसंख्ययाविनैवहुतायुतेनतर्पणमेवपुरश्चरणं विहितं करणीयम् एतेषां मन्त्राणां होमसंख्यया अयुतेनैवतर्पणं विहितम् ।

पूजामाह ।

नित्यमिति ।

नित्यं सर्वदासुसमाहितः संयतः सन् पूजयेत् वह्न्यादीशान्तम् आग्नेयकोणमारभ्य ईशानकोणपर्यन्तहृदादिकवचपर्यन्तमङ्गचतुष्टयम् पूजयेत् पुरतो ऽग्रेनेत्रमस्त्रं पूजयेत् ॥

पूर्वादिचतुर्दिक्षु इन्द्रादीन् पूजयेत् तदनुवज्रादीनिति ।

उपसंहरति ।

एषां मन्त्राणां सपर्या पूजाकथिता ॥

फलमाह ।

इत्येकमिति ।

अमुनाप्रकारेणयः साधकोत्तमएषां मन्त्राणांमध्येएकं मन्त्रंभजेत् उपासीततस्यसर्वे पुरुषार्थाहस्तप्राप्याःदेवैश्चासौपूज्यते ॥

मन्त्रान्तरमाह—

सद्य इति ।

तात्कालिकफलदायकमपरं चतुरक्षरमन्त्रंवक्ष्येसचतुरक्षरः कामवीजद्वयमध्यस्थेन कृष्णपदेनकथितः ॥

ऋष्यादिकमस्य ऋषिश्छन्दोदैवतम् अङ्गषट्कंचप्रागुक्तं पूर्वमन्त्रसमूहेकथितंवोद्धव्यम् ॥ १४२ ॥१४३ ॥ १४४ ॥ १४५ ॥ १४६ ॥

ध्यानमाह—

श्रीमदिति ।

श्रीमत्कल्पद्रुमूलोद्गतकमललसत्कर्णिकासंस्थितोयस्तच्छाखालम्बिपद्मोदरविगलदसंख्यातरत्नाभिषिक्तः हेमाभः स्वप्रभाभिस्त्रिभुवनमखिलं भासयन् वासुदेवः पायाद्वः पायसादोऽनवरतनवनीतामृताशीविशीसः१४७

वासुदेवःवोयुष्मान् पायात् कीदृशः यः श्रीयुक्तकल्पवृक्षमूलोद्गतपद्मेशोभमाना या कर्णिका तत्रोपविष्टः तथा कल्पद्रुमशाखालम्बियत् पद्मं तस्योदरं ततोविगलन्तिप्रसरान्तियानि असंख्यातानिरत्नानितैरभिषिक्तः तथा सुवर्णगौरः तथा स्वकान्तिभिः समस्तंत्रैलोक्यं भासयन् क्षीरान्नाशी तथा अनवरतमनुवेलं नूतनं नवनीतमेवामृतंतदश्नातीति ॥ १४७ ॥

पुरश्चरणमाह—

ध्यात्वेति ।

ध्यात्वैवं प्रजपेल्लक्षं चतुष्कं जुहुयात्ततः ।
त्रिमध्वक्तैर्विल्वफलैश्चत्वारिंशत्सहस्रकम् ॥१४८॥

यथोक्तं ध्यानं कृत्वा लक्षचतुष्टयं जपेत् तदनुघृतमधुशर्करायुतैर्विल्वफलैश्चत्वारिंशत्सहस्रं जुहुयात् ॥ १४८ ॥

पूजामाह—

अङ्गैरिति ।

अङ्गैर्निधिभिरिन्द्राद्यैर्वज्राद्यैरर्चनोदिता ।
तर्पयेद्दिनशः कृष्णं स्वादुत्रयधिया जलैः ॥ १४९ ॥

षडङ्गैः निधिभिरिन्द्रद्यष्टनिधिभिरिन्द्राद्यैर्वज्राद्यैश्चाऽनीलार्चना-पूजा कथिता ।

तर्पणमाह—

तर्पयेदिति ।

प्रतिदिनं स्वादुत्रयधिया घृतमधुशर्कराबुद्ध्या जलैः कृष्णं पूजयेत् ॥ १४९ ॥

मन्त्रान्तरमाह—

मारयोरिति ।

मारयोरस्य मांसाधोरक्तं चेदपरो मनुः ।
षडङ्गान्यस्य कलषट्दीर्घैर्मन्त्रशिखामणेः ॥१५०॥

अस्य पूर्वोक्तचतुरक्षरमन्त्रस्य मारयोराद्यन्तकामवीजयोर्मा-साधः लकारस्याधस्तात् चेद्यदि रक्तं रेफोभवति तदाऽपरश्चतुर-क्षरः क्लींकृष्णक्लीम् इति मन्त्रः अस्य मन्त्रशिखामणे मन्त्राशिरोर-त्नस्य कलषट्दीर्घैः कलाईकारसहितकामवीजेनषट्दीर्घैः कलसहि-तैर्नपुंसकरहितैः षाट्दीर्घस्वरैः षडङ्गानिकुर्यादितिशेषः ॥ १५० ॥

ध्यानमाह—

आरक्तेति ।

आरक्तोद्यानकल्पद्रुमशिखरलसत्स्वर्णदोलाधिरूढं-
गोपाभ्यांप्रेङ्ख्यमानंविकसितनवबन्धूकसिन्दूरभासम्॥
बालं नीलालकान्तं कठितटविलुठत्क्षुद्रघण्टाघटाढ्यम्॥
वन्देशार्दूलकामाङ्कुशललितगलाकल्पदीप्तंमुकुन्दम् २५१

मुकुन्दं वन्दे कीदृशम् आरक्तमरुणं यदुद्यानं तत्रः यः कल्प-

वृक्षस्तस्यशिखरमग्रं तत्रलसन्ती या शोभमाना सुवर्णमयी दोला तत्रोपविष्टं तथा गोपाङ्गनाभ्यां प्रेख्यमानं दोलायमानं विकसितं प्रफुल्लंनवीनं यद्वन्धुजीवपुष्पं सिन्दूरंतयोरिवभायस्यतं तथा बालं शिशुं तथाकृष्णकेशं तथा कटितटे इतस्ततोगच्छन्ती या क्षुद्रघण्टिकासमूहस्तेन सम्बद्धं तथा शार्दूलस्य व्याघ्रस्य घटाक्षुद्रघण्टिकाकामाङ्कुशेनशोभमानं यत्कण्ठभरणंतेनशोभमानम् ॥ १५१ ॥

ध्यात्वेति ।

एवं—

ध्यात्वैवं पूर्वक्लृप्त्यैनं जप्त्वा रक्तोत्पलैर्नवैः ॥
मधुत्त्रयप्लुतैर्हुत्वा ऽभ्यर्चयेत्पूर्ववद्धरिम् ॥ १५२ ॥

पूर्वोक्तं मुकुन्दं ध्यात्वाएनं मन्त्रं पूर्वोक्तमन्त्रजपसंख्यमेव-जप्त्वारक्तपद्मैर्नूतनैर्घृतमधुशर्करायुतैः पूर्वोक्तसंख्यमेवहुत्वा पूर्वोक्तप्रकारेण हरिं पूजयेत् ॥ १५२ ॥

आरादुक्तं मन्त्रयोः प्रयोगंदर्शयति—

मधुरेति ।

मधुरत्रयसंयुक्तामारक्तां शालिमञ्जरीम् ॥
जुहुयान्नित्यशोऽष्टोर्द्ध्वं शतमेकेन मन्त्रयोः ॥१५३॥

घृतमधुशर्करामिश्रितां लोहितांहैमन्तिकधान्यमञ्जरीम् अष्टोत्त-रशतमनयोमन्त्रयोर्मध्ये एकेनमन्त्रेणप्रत्येकं प्रत्यहं योजुहुयात् तस्यपुंसः मण्डलतः एकोनपञ्चाशद्दिनादर्वाक्षड्विंशतिदिना-दितिलघुदीपिकाकारः पञ्च चत्वारिंशद्दिनानन्तरमितिरुद्रधरः महती पृथिवी धान्यादिसमूहव्याप्ताभवति तथा तद्गृहं शालिधान्यसमू-हव्याप्तं शीघ्रं भवति ॥ १५३ ॥

तस्य मण्डलतः पृथ्वी पृथ्वीसस्यकुलाकुला ॥
स्याच्छालिपुञ्जपूर्णं च तद्वेश्माऽऽशु प्रजायते॥१५४॥

फलमाह—

यस्त्वति ।

यस्त्वेतयोर्नियतमन्यतरं भजेत ।
मन्वोर्जपार्चनहुतादिभिराप्तभक्तिः ॥
श्रीमान्स मन्मथ इव प्रमदासु वाग्मी ।
भूयात्तनोर्विपदि तच्च महोऽच्युताख्यम् ॥ १५५ ॥

इति क्रमदीपिकायां केशवकाश्मीर्याचार्य
विरचितायां सप्तमः पटलः ॥ ७ ॥

यः पुमानेतयोरेकं नियतं नियतो भजेत्साधयेत् कैर्जपपूजा-होमादिभिः कीदृशः प्राप्तभक्तिः स लक्ष्मीयुक्तः स्त्रीषु कामदेववत् उत्कृष्टवचनभाक् भवति तनोर्विपदि शरीरपातानन्तरं विष्णुलोकं च गच्छति ॥ १५५ ॥

इति श्रीगोविन्दविद्याविनोदभट्टाचार्यविरचिते क्रमदीपिका-
विवरणे सप्तमः पटलः ॥ ७ ॥

अथोच्यते वश्यविधिः पुरोक्त-
दशार्णतोऽष्टादशवर्णतश्च ॥
स्मृत्यैव यौ सर्वजगत् प्रियत्वं-
मनू मनुज्ञस्य सदा विधत्तः ॥ १ ॥

अथाऽनन्तरं वश्यकरः प्रयोगः कथ्यते पूर्वोक्तदशाक्षरस्याऽष्टाद-शाक्षरस्य च यौ मन्त्रौ स्मरणमात्रेण साधकस्य सर्वजनवल्लभत्वं सर्वदा कुरुतः ॥ १ ॥

२७

फुल्लैरिति ।

फुल्लैर्वन्यप्रसूनैरमुमरुणतरैरर्चयित्वा दिनादौ ।
नित्यंनित्याक्रियायांरतमथ-
दिनमध्योक्तक्लृप्त्यामुकुन्दम् ॥
अष्टोपेतं सहस्रं दशलिपिमनुवर्यं जपेद् यः स मन्त्री ।
कुर्याद्वश्यान्यवश्यंमुखरमुखभुवांमण्डलान्मण्डलानि२

पुष्पितैः वनोद्भवपुष्पैरतिलोहितममुंमुकुन्दं नित्यं सर्वदा नित्यकर्मानुष्ठाननिष्ठं दिनादौ प्रातः प्रत्यहं मध्याह्नोक्तपूजाप्रकारेण पूजयित्वा यो मन्त्री दशाक्षरं मन्त्रश्रेष्ठम् अष्टाधिकं सहस्रं जपेत् मण्डलादेव पञ्चाशद्दिनादर्वाक्मुखरमुखभुवां विद्वद्ब्राह्मणानां मण्डलानि समूहानवश्यं वश्यानि कुर्याद्वशयतीत्यर्थः ॥ २ ॥

क्षत्रियवैश्यशूद्रस्याऽपि प्रयोगत्रयं दर्शयति ।

जातीति ।

जातीप्रसूनैर्वरगोपवेषं-
क्रीडारतं रक्तहयारिपुष्पैः ॥
नीलोत्पलैर्गीतिरतं पुरोव-
दिष्ट्वा नृपादीन् वशयेत् क्रमेण ॥ ३ ॥

वरगोपवेषं श्रेष्ठगोपरूपधरं श्रीकृष्णं विचिन्त्य जातीपुष्पैः पूर्वोक्तप्रकारेण पूजयित्वा दशाक्षरमन्त्रमष्टोत्तरसहस्रं जप्त्वा क्षत्रियं वशयेत् क्रीडासक्तं ध्यात्वा रक्तकरवीरपुष्पैः पूर्वोक्तप्रकारेण पूजयित्वा दशाक्षरमन्त्रमष्टोत्तरं सहस्रं जप्त्वा वैश्यंवशयेत् गीतिरतं गीतासक्तं ध्यात्वा नीलोत्पलैः पूर्वोक्तप्रकारेण पूजयित्वा दशाक्षरमन्त्रमष्टोत्तर सहस्रं जप्त्वा शूद्रं वशयेत् इत्यनेन प्रकारेणनृपादीन् वशयेदित्यर्थः॥ ३॥

प्रयोगान्तरमाह—

सितेति—

सितकुसुमसमेतैस्तण्डुलैराज्यसिक्तै-
र्दशशतमथ हुत्वा नित्यशः सप्तरात्रम् ।

कचभुवि च ललाटे भस्म तद्धारयन्ना ।
वशयति मनुजस्त्रीं साऽपि नॄंस्तद्वदेव ॥ ४ ॥

श्वेतपुष्पसहितैः श्वेततण्डुलैर्घृतमिश्रितदशाक्षरमन्त्रेण दशशतं हुत्वा नित्यशः सप्तदिनपर्यन्तं तदनु तद्धोमभस्म कचभुवि शिरसि ललाटे च धारयन् ना पुरुषः मनुजस्त्रीं मनुष्यनारीमिति रुद्रधरः तरुणीं स्त्रियं वशयतीति त्रिपाठिनः साऽपि स्त्री अनेन प्रयोगेण नॄन् वशयेदित्यर्थः ॥ ४ ॥

प्रयोगान्तरमाह—
ताम्बूलेति ।

ताम्बूलवस्त्रकुसुमाञ्जनचन्दनाद्यं-
जप्तं सहस्त्रत्रयमन्यतरेण मन्वोः ॥
यस्मै ददाति मनुवित् स जनोऽस्य मङ्क्षु ।
स्याद् किङ्करो न खलु तत्र विचारणीयम् ॥ ५ ॥

ताम्बूलं वस्त्रं पुष्पं कज्जलं चन्दनं च एतद्यदन्यद्वस्तु मन्वोर्दशाष्टादशाक्षरयोरन्यतरेणैकेन सहस्त्रत्रयं संजप्तं यस्मै जनाय ददाति साधकः स नरोऽस्य साधकस्य मङ्क्षुशीघ्रं वश्यो भवति नाऽत्र संशय इत्यर्थः ॥ ५ ॥

प्रयोगान्तरमाह—
राजद्वारे इति ।

राजद्वारे व्यवहारे सभाया-
द्यूते वादे चाऽष्टयुक्तं शतं च ॥
जप्त्वा वाचं प्रथमामीरयेद्यो-
वर्त्तेताऽसौ तत्र तत्रोपविष्टान् ॥ ६ ॥

राजसमीपे क्रयविक्रये सदसि अक्षक्रीडादौ वादे च यो मन्वोरेकमष्टोत्तरशतं जप्त्वा प्रथमत एव यां वाचं वदति तयैववाचा तत्र वादादौ उपविष्टानसौ वर्तेत तज्जयी भवतीत्यर्थः ॥ ६ ॥

प्रयोगान्तरमाह—

आसीनमिति ।

आसीनं मुरमथनं कदम्बमूले ।
गायन्तं मधुरतरं व्रजाङ्गनाभिः ॥
स्मृत्वाऽग्नौ मधुमिलितैर्मयूरकेध्मै-
र्हुत्वा ऽसौ वशयति मन्त्रवित्त्रिलोकीम् ॥ ७ ॥

कदम्बमूले उपविष्टं मुरमथनं कृष्णं गोपीभिर्मधुरतरं गायन्तं ध्यात्वा वह्नौ मधुप्लुतैर्मयूरकेध्मैरपामार्गसमिद्भिर्हुत्वा असौ साधको लोकत्रयं वशयति ॥ ७ ॥

प्रयोगान्तरमाह—

रासेति ।

रासमध्यगतमच्युतं स्मरन् ।
यो जपेद्दशशतं दशाक्षरम् ॥
नित्यशो झटिति मासतो नरो-
वाञ्छितामभिवहेत्स कन्यकाम् ॥ ८ ॥

यो नरः पूर्वोक्तरासमध्यगतं कृष्णं ध्यायन् दशाक्षरं मन्त्रं प्रत्यहं दशशतं जपेत् स मासैकेन शीघ्रमेव वाञ्छितां कन्यां प्राप्नोति ॥ ८ ॥

प्रयोगान्तरमाह—

तुङ्गेति ।

तुङ्गकुन्दमधिरूढमच्युतं-
या विचिन्त्य दिनशः सहस्रकम् ॥
साऽष्टकं जपति सा हि मण्डला-
द्वाञ्छितं वरमुपैति कन्यका ॥ ९ ॥

उच्चकदम्बवृक्षस्थं विचिन्त्य प्रत्यहम् अष्टोत्तरसहस्रंदशाक्षरं या कन्यका जपति सा हिनिश्चयेन मण्डलादेकोनपञ्चाशद्दिनादर्वाक्वाञ्छितवरं प्राप्नोति ॥ ९ ॥

समानफलं प्रयोगद्वयमाह—

नृत्यन्तमिति ।

नृत्यन्तं व्रजसुन्दरीजनकराम्भोजानि संगृह्य तं-
ध्यात्वाऽष्टादशवर्णकं मधुवरं लक्षं जपन्मन्त्रवित् ॥
लाजानामथवा मधुप्लुततरैर्हुत्वा ऽयुतं चूर्णकै-
रुद्धोऽं प्रजपेच्च तावदचिरादाकाङ्क्षितां कन्यकाम् ॥१०॥

अचिरात् शीघ्रवाञ्छितांकन्यां परिणेतुं मन्त्रवित्साधकः गोपयुवतीहस्तपद्मानि संगृह्य धृत्वानृत्यन्तं तं प्रसिद्धं श्रीकृष्णं ध्यात्वालक्षमात्रपरिमितमष्टादशाक्षरं मन्त्रश्रेष्ठं जपेत् अथवा लाजानां चूर्णैर्मधुद्रुततरैर्घृतमधुशर्कराप्रचुरान्वितैः मधुना द्रवीभूतैरितिरुद्रधरः दशसहस्रंहुत्वातावदेवसंख्यं जपेदित्यर्थः ॥ १० ॥

प्रयोगान्तरमाह—

अष्टादशेति ।

अष्टादशाक्षरेण द्विजतरुजैस्त्रिमध्वक्तैरयुतम् ॥
कुशैस्तिलैर्वा सतण्डुलैर्वशयितुं द्विजान् जुहुयात् ११॥

द्विजान् ब्राह्मणान् वशयितुमष्टादशाक्षरमन्त्रेणाद्विजतरुजैः पलाशवृक्षसमुद्भवैः समिद्भिस्त्रिमधुराक्तैः घृतमधुशर्करामिश्रितैरयुतं दशसहस्रं जुहुयात् अथवात्रिमध्वक्तैः कुशैस्तिलैः तण्डुलैर्वाजुहुयात् ॥ ११ ॥

प्रयोगान्तरमाह—

कृतमालभवैर्वशयेन् नृपतीन् ।
मुकुलैश्च कुरुण्टकजैश्च तथा ॥
विशमिक्षुरकैरपि पाटलजै-
रितरानपि तद्वदथो वशयेत् ॥ १२ ॥

कृतमालभवैः राजवृक्षसमुद्भवैः मुकुलैः कलिकाभिः हुत्वानृपतीन् क्षत्रियान् वशयेत् कुरुण्टकजैश्च झिंटीसमुद्भवैः मुकुलैर्हुत्वावैश्यान् वशयेत् इक्षुरसैः इक्षुरकैरितिपाठे कोकिलाक्षोमथीनथइत्यर्थः पाटलसमुद्भवैः मुकुलैर्वाहुत्वा इतरान् शूद्रान् वशयेत्

अनुक्तसंख्याहोमस्यबोद्धव्यातस्याएवप्रकरणत्वादिति १२ ॥

प्रयोगान्तरमाह—

अभिनवैरिति ।

अभिनवैः कमलैररुणोत्पलैः ।
समधुरैरपि चम्पकपाटलैः ॥
प्रतिहुनेदयुतं क्रमशोऽचिरा-
द्वशयितुं मुखजादिवराङ्गनाः ॥ १३ ॥

शीघ्रं मुखजादिवराङ्गना ब्राह्मणादिस्त्रियोवशयितुंचतुर्भिर्द्रव्यैः समधुरैर्मधुरत्रयामिलितैः क्रमशः प्रत्येकं सार्द्धसहस्रद्वयं कृत्वा दशसहस्रं प्रतिहुनेत् जुहुयात् ।

द्रव्याण्याह ।

नूतनैः श्वेतपद्मैः रक्तोत्पलैश्चम्पकपुष्पैः पाटलपुष्पैः ॥ १३ ॥

प्रयोगान्तरमाह—

हयारीति ।

हयारिकुसुमैर्नवैस्त्रिमधुराप्लुतैर्नित्यशः ।
सहस्रमृषिवासरं प्रतिहुनेन्निशीथे बुधः ॥
सुगर्विताधियं हठात् झटिति वारयोषामसौ ।
करोति निजकिङ्करीं स्मरशिलीमुखैरर्दिताम्॥१४॥

हयारिकुसुमैः करवीरकुसुमैः नूतनैः त्रिमधुरामिश्रितैः प्रत्यहं सहस्रं ऋषिवासरंसप्तवासरंबुधः साधकोनिशीथेरात्रौप्रत्यहं प्रतिदिनं जुहुयात् असौ अहंकारवतीं वारयोषां वेश्याकामवाणैः पीडितां हठात् वलात् झटितिशीघ्रं निजदासींकरोति ॥ १४ ॥

प्रयोगान्तरमाह—

पटुसंयुतैरिति ।

पटुसंयुतैस्त्रिमधुरार्द्रतरै-
रपि सर्षपैर्दशशतं त्रितयम् ॥

निशि जुह्वतोऽस्य हि शचीदयितोऽ-
प्यवशो वशी भवति किंन्वपरे ॥ १५ ॥

लवणसंयुतैः कटुसंयुतैरितिपाठेकटुकसंयुतैरित्यर्थः मधुरार्द्र-तरैर्घृतमधुशर्करास्निग्धैरपिः समुच्चये सर्षपैर्दशशतं त्रितयंत्रिसहस्रं निशिरात्रौजुह्वतः पुरुषस्यशचीदयितः ईन्द्रोपि अवशोवशीभवति किं पुनरन्ये ॥ १५ ॥

प्रयोगान्तरमाह—

अथेति ।

अथ विल्वजैः फलसमित्प्रसव-
च्छदनैर्मधुद्रुततरैर्हवनात् ॥
कमलैः सिताक्षतयुतैश्च पृथक् ।
कमलां चिराय वशयेदचिरात् ॥ १६ ॥

विल्ववृक्षोद्भवैः फलसमित्पुष्पपत्रैः श्वेतपद्मैरत्यन्तमधुरा-प्लुतैः सिताक्षतयुतैः शर्करातण्डुलमिश्रितैः सिताज्यसाहितैरिति-पाठे सिताशर्करा आज्यं घृतं तत्सहितैः पृथक् एकैकं वस्तु-त्रिसहस्रहोमात् चिरकालम् अचिरात् शीघ्रंकमलां लक्ष्मींवशये-त् अत्रसंख्यासमनन्तरोक्ता ॥ १६ ॥

प्रयोगान्तरमाह—

अपहृत्येति ।

अपहृत्यगोपवनिताम्बराण्यमा ।
हृदयैः कदम्बमधिरूढमच्युतम् ॥
प्रजपेत्स्मरान्निशि सहस्रमानयेद्-
द्रुतमुर्वशीमपि हवादशाहतः ॥ १७ ॥

हृदयैः अमासह हठात् गोपयुवतीवस्त्राण्यपहृत्यगृहीत्वाकदम्ब-वृक्षमधिरूढं कृष्णंस्मरन् निशिरात्रौसहस्रंजपेत्स दशाहतो दश-दिवसमध्येहठान्मन्त्रस्यवलात् उर्वशीमपिदेववेश्यामपि वशमानये-त् निजनिकटामिति शेषः ॥ १७ ॥

मन्त्रयोर्माहात्म्यमाह—

बहुनेति ।

बहुना किमत्र कथितेन मन्त्रयो-
रनयोः सदृक् न हि परो वशी कृतौ ॥
अभिकृष्टिकर्मणि विदग्धयोषितां-
कुसुमायुधास्त्रमयवर्ष्मणोरिह ॥ १८ ॥

अत्र ग्रन्थेबहुनाकथितेनकिं प्रयोजनम् अनयोर्दशाष्टादशाक्षरयोः सदृक्समः वशीकरणेइहजगति अपरोनास्तिकिम्भूतयोर्नगरस्त्रीणामाकर्षणकर्मणिकामास्त्रशरीरयोः ॥ १८ ॥

मोक्षसाधकप्रयोगान्तरमाह—

वन्द इति ।

वन्दे कुन्देन्दुगौरं तरुणमरुणपथोजपत्राभनेत्रं-
चक्रं शङ्खं गदाब्जे निजभुजपरिघैरायतैरादधानम् ।
दिव्यैर्भूषाङ्गरागैर्नवनलिनलसन्मालयाचप्रदीप्तं-
प्रोद्यत्पीताम्बराढ्यंमुनिभिरभिवृतंपद्मसंस्थं मुकुन्दम् १९

मुकुन्दंवन्दे कीदृशं कुन्दपुष्पंचन्द्रश्चतद्वत् शुक्लं तथा युवानं तथारक्तपद्मसदृशलोचनं तथा दीर्घैर्निजबाहुपरिघैर्मुद्गराकारस्वबाहुभिः शङ्खचक्रंगदां पद्मश्चधारयन्तं तथा देवयोग्यालङ्काराङ्गरागैः नवा नियानिपद्मानितेषां लसन्तीदेदीप्यमाना या माला तयाच्चप्रदीप्तं तथा देदीप्यमानहरिद्राभवस्त्रयुक्तं तथा नारदादिभिर्वेष्टितं तथा पङ्कजासीनम् ॥ १९ ॥

एवमिति—

एवं ध्यात्वापुमांसं स्फुटहृदयसरोजनासीनमाद्यं-
सान्द्राभोजच्छबिम्बा द्रुतकनकनिभं वा जपेदकलक्षम् ।
मन्वोरेकं द्वितारान्तरितमथहुनेदर्कसाहस्त्रमिद्ध्मैः ।
क्षीरद्रूत्थैः पयोक्तैः समधुघृतसितेनाऽथवा पायसेन२०

एवंविधं पूर्वोक्तं मुकुन्दंध्यात्वाप्रफुल्लहृदयपद्मासनोपविष्टं तथा

आद्यं प्रथमं सजलजलदश्यामं सान्द्राभोजच्छविमितिपाठे मसृण-पद्मकान्तिं वा ध्यात्वा द्वितारान्तरगं प्रणवद्वयमध्यगतं मन्वोर्दशाष्टादशाक्षरयोरेकम् अर्कलक्षं द्वादशलक्षं जपेत् अथजपानन्तरम् अर्कसहस्रम् इध्मैः समिद्भिः क्षीरद्रुत्थैरश्वत्थोदुम्बरप्लक्षन्यग्रोधान्यतमसमुद्भवैः पयोक्तैः दुग्धप्लुतैः अथवाघृतमधुशर्करासहितेन-परमान्नेन जुहुयात् ॥ २० ॥

ततो लोकाध्यक्षं ध्रुवचितिसदानन्दवपुषम्-
निजे हृत्पाथोजे भवतिमिरसंभेदमिहिरम् ॥
निजैक्येन ध्यायन्मनुममलचेताः प्रतिदिनं-
त्रिसाहस्रं जप्यात्प्रयजतु च सायाह्नविधिना ॥२१॥

ततस्तदनन्तरं लोकाध्यक्षंलोकस्वामिनम्

अविनाशिज्ञानं तत्सुखस्वरूपशरीरं संसारान्धकारविच्छेदसूर्यममुं कृष्णं निजहृदयपद्मे निजैक्येन स्वाभेदेन भावयन् अमलचेताः निर्मलान्तःकरणः प्रतिदिनं त्रिसहस्रंसहस्रत्रयं जुहुयात् तथा पूर्वोक्तसायाह्नपूजाप्रकारेणपूजयतु होममपिकरोतु ॥ २१ ॥

बिधिमिति—

विधिं योऽमुं भक्त्या भजति नियतं सुस्थिरमति-
र्भवाम्भोधिं भीमं विषमविषयग्राहनिकरैः ॥
तरङ्गैरुत्तुङ्गैर्जनिमृतिसमाख्यैः प्रविततं-
समुत्तीर्याऽनन्तं व्रजति परमं धाम स हरेः ॥ २२ ॥

यः स्थिरमतिः पुमान् अमुंविधिं प्रकारं नियतं सततं भक्त्या-भजतिसेवते स भवाम्भोधिं संसारसागरं समुत्तीर्य हरेः अनन्यं न-विद्यते अन्योयस्मात्सर्वमयमुत्कृष्टं धामप्राप्नोतिकीदृशम् अम्भोधिरिवभयङ्करं कैर्विषमादुर्निवाराः येविषयाः शब्दादयः अथवास्रक्चन्दनवनिताद्याः त एव ग्राहरूपामकरकच्छपाद्यास्तेषां निकरैः समूहैः तथा जन्ममरणनामधेयैस्तरङ्गैरुत्तुङ्गैर्महद्भिर्विस्तीर्णम् ॥ २२ ॥

गृणंस्तस्येति ।

गृणंस्तस्य नामानि शृण्वंस्तदीयाः ।
कथाः संस्मरंस्तस्य रूपाणि नित्यम्
नमंस्तत्पदाम्भोरुहं भक्तिनम्रः ।
स पूज्यो बुधैर्नित्ययुक्तः स एव ॥ २३ ॥

सपुरुषः बुधैः प्राज्ञैः पूज्यः स एव च नित्ययुक्तः नित्ययोगभाक् किङ्कुर्वन्सन् अस्यश्रीकृष्णस्यनामानिगृणन् वदन् तदीयाः कथाः आकलयन् तस्य श्रीकृष्णस्य रूपाणिमूर्तीः सर्वदाध्यायन् तत्पदाम्भोरुहं श्रीकृष्णपादपद्मं नमन् भक्तिनम्रः सेवाऽवनतः अधिकनम्रत्वख्यापनार्थंपौनरुक्त्यम् ॥ २३ ॥

इदानीं परममन्त्रद्वयं कथयति ।

वक्ष्य इति ।

वक्ष्ये मनुद्वयमथा ऽतिरहस्यमन्यत् ।
संक्षेपतो भुवनमोहननामधेयम् ॥
ब्रह्मेन्द्रवामनयनेन्दुभिरादिमान्य-
स्तत्पूर्वको वियदृषीकयुतेशङेहृत् ॥ २४ ॥

अथा ऽनन्तरमन्यत् मन्त्रद्वयमतिगोप्यं जगन्मोहनसंज्ञकंस्वल्पोक्त्यावक्ष्ये ब्रह्मककारः इन्द्रोलकारः वामनयनं दीर्घ ईकारः इन्दुरनुस्वारः एतैः संयुक्तः कामबीजरूपः प्रथमोमन्त्र उद्धृतः तत्पूर्वकः वियत् हकारः ऋषीक इति स्वरूपं ताभ्यां युक्तईशशब्दः हृषीकेश इति स्वरूपं ङे चतुर्थ्येकवचनं हृन्नमः क्लींहृषीकेशायनमः इति द्वितीयोमन्त्रः अत्रायं पुरुषोत्तममन्त्र इति भैरवात्रिपाठिनः ॥ २४ ॥

ऋष्यादिकमाह—

मन्वोरिति ।

मन्वोस्तु संमोहननारदोमुनिः ।
छन्दस्तु गायत्रमुदीरितं बुधैः ॥

त्रैलोक्यसंमोहनविष्णुरेतयोः ।
स्याद्देवता वच्म्यधुना षडङ्गकम् ॥२५ ॥

अनयोर्मन्त्रयोः संमोहननारदो मुनिः छन्दः पुनर्गायत्रं मन्त्रज्ञैः कथितं त्रैलोक्यसंमोहनविष्णुर्देवतेति ॥ २५ ॥

अधुनाषडङ्गंवदामि—

अक्लीवेति ।

अक्लीवदीर्घैः सलवैस्तदपि च कलासनारूढैः ।
उक्तं पूर्ववदासनविन्यासान्तं समाचरेदथ तु ॥ २६ ॥

ऋॠऌॡवर्जितषड्दीर्घस्वरैः विन्दुसहितैः कलेत्यक्षरद्वयसंवद्धैः क्लाँ क्लीं क्लूँ क्लैं क्लौं क्लः एभिस्तत् षडङ्गमुक्तम अथानन्तरं पूर्ववद्दशाक्षरकथितपीठपूजापर्यन्तं कार्यम् ॥ २६ ॥

करयोरिति ।

करयोः शाखासु तले न्यस्य षडङ्गानि चाऽङ्गुलीषु शरान् ।
मनुपुटितमातृकार्णैर्न्यस्याङ्गेऽङ्गानि विन्यसेच्च शरान्२७

करयोः शाखासु अङ्गुलीषु उभयकरतले च षडङ्गानिविन्यस्य पुनरङ्गुलीषु च कामवाणान् विन्यस्य आद्यन्तस्थितमन्त्रमातृकाक्षरैर्मातृकास्थानेषु विन्यस्य दीर्घयुक्तकामवीजैः षडङ्गानिस्वशरीरेविन्यस्य वाणन्यासं च कुर्यात् ॥ २७ ॥

वाणन्यासस्थानान्याह—

कास्येति ।

कास्यहृदयलिङ्गाङ्घ्रिषुकर-
शाखाभिर्नमोन्तकान्ङेऽन्तान् ॥
शोषणमोहनसंदीपनतापनमादनान् क्रमशः ॥ २८ ॥
पञ्चैते संप्रोक्ता ह्रांह्रींक्लींक्लूं सआदिकावाणाः ।
समोहनमथजगतां ध्यायेत् पुरुषोत्तमं समाहितधीः२९॥

शिरोवदनहृदयलिङ्गपादेषु अङ्गुलीभिः अङ्गुष्ठादिकनिष्ठिकान्ता-

भिः एकैकया अङ्गुल्या चतुर्थीनमःपदसहितान् वक्ष्यमाणान् पञ्च-वाणान् क्रमेणाविन्यसेत् ।

वाणनामान्याह—

शोषणेति ।

ह्राँ ह्रीं क्लीं क्लूं सः एतानिपञ्चबीजानिएकैकानि आदौयेषां एवम् एते पञ्चवाणाःशोषणादयः प्रोक्ताः प्रयोगस्तु ह्राँशोषणायनमः इत्यङ्गुष्ठेन शिरसि ह्रींमोहनायनमः इति तर्जन्यामुखे इत्यादि अथानन्तरम् संयतचित्तः त्रिभुवनवश्यकरं पुरुषोत्तमंचिन्तयेत् ॥ २८ ॥ २९ ॥

ध्यानमाह—

दिव्येति ।

दिव्यतरूद्यानोद्यद्रुचिरमहाकल्पपादपाधस्तात् ।
मणिमयभूतलविलसद्भद्रपयोजन्मपीठनिष्ठस्य ॥ ३० ॥
विश्वप्राणस्योद्यत्प्रद्योतनसमद्युतेः सुपर्णस्य ।
आसीनमुन्नतांसे विद्रुमभद्राङ्गमङ्गजोन्मथितम् ॥ ३१ ॥
चक्रदराङ्कुशपाशान्सुमनोवाणेक्षुचापकमलगदाः ।
दधतं स्वदोर्भिररुणायतविपुल-
विघूर्णिताक्षियुगनलिनम् ॥ ३२ ॥
मणिमयकिरीटकुण्डलहाराङ्गदकङ्कणोर्मिरसनाद्यैः ।
अरुणैर्माल्यविलेपैरादीप्तं पीतवस्त्रपरिधानम् ॥ ३३ ॥
निजवामोरुनिषण्णांश्लिष्यन्तींवामहस्तधृतनलिनाम्
क्लिद्यद्योनिकमलांमदनमदव्याकुलोज्ज्वलाङ्गलताम् ३४॥
सुरुचिरभूषणमाल्यानुलेपनांसुसितवसनपरिवीताम् ।
निजमुखकमलव्यापृतचटुला-
सितनयनमधुकरांतरुणीम् ॥ ३५ ॥
श्लिष्यन्तं वामभुजादण्डेन दृढं धृतेक्षुचापेन ।

तज्जनितपरमनिर्वृतिनिर्भरहृदयं चराचरैकगुरुम् ॥३६॥
सुरदितिजभुजगगुह्यकगन्धर्वाद्यङ्गनाजनसहस्रैः ।
मदमन्मथालसाङ्गैरभिवीतं दिव्यभूषणोल्लसितैः ॥३७॥
आत्माभेदतयेत्थंध्यात्वैकाक्षरमथाऽष्टवर्णं वा ।
प्रजपेद्दिनकरलक्षंत्रिमधुरसिक्तैस्तु किंशुकप्रसवैः ॥३८॥

नवश्लोकानां कुलकम् ।

इत्थम् एवं वासुदेवं ध्यात्वा एकाक्षरकामबीजम् अथवाष्टाक्षरमन्त्रं दिनकरलक्षंद्वादशलक्षं जपेत् कीदृशं ध्यात्वा देवसंबन्धिवृक्षोद्याने कल्पवृक्षोद्याने उद्यन् वृद्धिगच्छन् मनोहरो यः पारिजातवृक्षस्तस्य तले गरुडस्योन्नतांसे उपविष्टं कीदृशस्य गरुडस्य पद्मरागादिघटितभूभागशोभमानश्रेष्ठपद्मपीठोपविष्टस्य तथा सकलजीवभूतस्य परमेश्वरस्यांशत्वात् तथा उदितसूर्यसमकान्तेः कीदृशं वासुदेवं प्रवालसुदराङ्गं तथा कामव्याकुलितं स्वदोर्भिः स्वबाहुभिर्दक्षिणवामक्रमेण चक्रशङ्खाङ्कुशपाशपुष्पशरेक्षुचापपद्मगदाः बिभ्राणं तथा रक्तंदीर्घं बृहद्विघूर्णितंनेत्रद्वयरूपं पद्मं यस्य स तथातम् पद्मरागादिमणिघटिताशिरोलंकारकर्णभूषणमुक्ताहारबाहुभूषणकरमूलभूषणमुद्रिकाक्षुद्रघण्टिकाप्रभृतिभिः रक्तमाल्यगन्धैश्च देदीप्यमानं तथा पीते वाससी परिधानमाच्छादनं यस्य स तथातं तथा धृतेक्षुचापेन वामबाहुदण्डेन दृढं यथा स्यादेवं श्रियमालिङ्गन्तम् ।

कीदृशीं स्वीयवामोरुदेशे उपविष्टां तथा आलिङ्गन्तीं तथा वामहस्तगृहीतपद्मां तथासरसीभूतगुह्यां तथा कामेनव्याकुलीकृता-अनायत्तीकृता अङ्गलता यस्यास्तां मनोहराणि अलङ्कारमालाचन्दनानियस्यास्तां तथा श्वेतवस्त्रपरिधानां तथा कृष्णमुखपद्मेऽव्यापृतं सम्यग्व्यापारयुक्तं चटुलंमनोहरं चञ्चलं वा असितंश्यामंयन्नेत्रं स एव मधुकरो भ्रमरः यस्यास्तां तथा तरुणीं युवतीं पुनः कीदृशं प्रियालिङ्गनजानितपरमसुखपूर्णहृदयं तथा जगद्गुरुं तथा देवदैत्यसर्पदेवयोनिदेवगायनविद्याधरस्त्रीसहस्रैर्मदतया कामेन च स्त-

म्भयुक्तम् अङ्गैयेषान्तैर्दैवार्हणभूषणदीप्तैर्वेष्टितं कयायुक्त्या आत्मैक्ये-नध्यात्वा ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

जुहुयात्तरणिसहस्रं विमलैः सलिलैश्च तर्पयेत्तावत्
विंशत्यर्णे प्रोक्तेयन्त्रेदिनशोऽमुमर्चयेत् भक्त्या ॥ ३९ ॥

ध्यानजपानन्तरं घृतमधुशर्करासहितैः पलाशपुष्पैर्द्वादशसहस्रं जुहुयात् होमानन्तरंनिर्मलैर्जलैर्द्वादशसहस्रंतर्पणंकुर्यात् ।

विंशत्यर्णेति ।

पूर्वोक्तविंशत्यक्षरोदितपीठविधानेनतन्मन्त्रोद्धृतयन्त्रे अमुं कृष्णंभक्त्याप्रतिदिनं पूजयेत् ॥ ३९ ॥

पूजाप्रकारमाह—

सार्द्ध चतुः श्लोकेनगरुडमन्त्रमाह—

पीठेति ।

पीठविधौपक्ष्यन्ते राजायशिरोऽमुनाऽभिपूज्याऽहिरिपुम्
हरिमावाह्यस्कन्धेतस्यार्घाद्यैः समर्च्य भूषान्तैः ॥ ४० ॥
अङ्गानि च बाणांश्च न्यासक्रमतः किरीटमपिशिरसि ॥
श्रवसोश्चकुण्डलेऽरिप्रमुखानि प्रहरणानि पाणिषु च ४१॥
श्रीवत्सकौस्तुभौ च स्तनयोरुर्द्धेगले च वनमालाम् ।
पीतवसनं नितम्बेवामाङ्केश्रियमपि स्वबीजेन ॥ ४२ ॥
इष्ट्वाऽथ कर्णिकायामङ्गानिविदिग्दिशासुदिक्षुशरान् ।
कोणेषुपञ्चमं पुनरग्न्यादिदलेषु शक्तयः पूज्याः ॥४३॥

पूजाविधौपक्षिशब्दान्ते राजायेति स्वरूपं शिरः स्वाहा अनेनप्रकारेणपीठमध्ये अहिरिपुंगरुडंसम्पूज्य तस्यगरुडस्य पृष्ठेश्रीकृष्णमावाह्याऽऽवाहनादियथावत् कृत्वाऽर्घाद्यैर्भूषान्तैरुपचारैश्च सम्पूज्य अङ्गानि च सम्पूज्यपञ्चबाणांश्च सम्पूज्य भूषणानि च सम्पूज्यदिग्दलेषुशक्तयः पूज्या इति अनेनान्वयः ।

एतदेवस्पष्टयति—

न्यासक्रमत इत्यादिना ।

यत्रपरमेश्वराङ्गे यस्य न्यासः तस्य पूजाबोद्धव्या तत्रशिरसिकिरीटं अपिपादपूरणे श्रोत्रयोः कुण्डले अरिमुखानि चक्रादीनि प्रहरणानि आयुधानिहस्तेषुस्तनयोऊर्द्ध्वेहृदि श्रीवत्सकौस्तुभौ गलेवनमालाम् आपादलम्बिनींपद्ममालां नितम्बेकट्यां हारिद्राभवस्त्रं वामाङ्गेवामभागेलक्ष्मीं च स्ववीजेन श्रीवीजेन इष्ट्वासम्पूज्य कर्णिकायां दिग्विदिशासुकोणेषुदिक्षु च अङ्गानि पूर्ववत्सम्पूज्यदिक्षुशरान् अग्न्यादिकोणेषुचपञ्चमं वाणं पूजयेत् पुनरग्न्यादिदलेषु अष्टौशक्तयः पूज्याः ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

शक्तिवर्णानाह—

लक्ष्मीरिति ।

लक्ष्मीः सरस्वती स्वर्णाभे अरुणतरे रतिप्रीत्यौ ।
कीर्तिः कान्तिश्च सिते तुष्टिः पुष्टिश्च मरकतप्रतिमे॥४४॥

स्वर्णाभेपीतवर्णे अरुणतरेअतिरक्ते सितेशुक्ले मरकतप्रतिमेहरिद्रावर्णे ॥ ४४ ॥

एताः शक्तयः किम्भूताः ।

दिव्याङ्गरागभूषा-
माल्यदुकूलैरलङ्कृताङ्गलताः ॥
स्मेराननाः स्मरार्त्ता-
धृतचामरचारुकरतला एताः ॥ ४५ ॥

देवयोग्यानुलेपनालङ्कारग्रन्थितपुष्पसूक्ष्मवस्त्रैर्भूषितदेहाः अङ्गलताशब्दः स्वरूपवाची तथा ईषद्धास्यवदना तथा कामवाणपीडिताः तथा गृहीतचामरमनोहरहस्ताः ॥ ४५ ॥

लोकेशा इति ।

लोकेशा वहिरर्च्याः-
कथितेत्यर्चा मनुद्भयोद्भूता ॥

प्रायः पुरुषोत्तमविधि-
रेवं हि स नोच्यतेऽत्रबहुलत्वात् ॥ ४६ ॥

तद्बहिरिन्द्रादयः वज्रादयश्चपूज्याः इत्येवंपूजा मन्त्रद्वयसम्भवा कथिता प्रायोबाहुल्येनपुरुषोत्तममन्त्रोथितप्रकारोप्येवम्परं स इह स्पष्टीकृत्य नोच्यते बहुवक्तव्यत्वात् प्रायः पुरुषोत्तमविधिरेवमिहाऽन्यतोऽवगन्तव्यमिति टीकान्तरसम्मतं पाठान्तरम् ॥ ४६ ॥

संमोहनगायत्रीमाह—

त्रैलोक्येति ।

त्रैलोक्यमोहनाये-
त्युक्त्वा विद्महइति स्मरायेति ।
तत् धीमहीति तन्नो-
ऽन्तेविष्णुस्तदनुप्रचोदयात् ॥ ४७ ॥

त्रैलोक्यमोहनायेति स्वरूपमुक्त्वातदनन्तरं विद्महे इति स्मरायेति तदनुधीमहीति तन्नोविष्णुः प्रचोदयादिति स्वरूपंवदेत् ॥ ४७ ॥

प्रभावमाह—

जप्यैषा हि जपादौ-
दुरितहरी श्रीकरी जपार्चनहवनैः ।
प्रोक्षयतु शुद्धिविधये-
ऽर्चायामनयात्मयागभूद्रव्याणि ॥ ४८ ॥

एषागायत्रीजपात् पूर्वं जपनीया स्वमन्त्रजपपूजाहोमैः पुनः पापनाशनी लक्ष्मीप्रदा च भवति अनयागायत्र्या च पूजायां शुद्ध्यर्थं आत्मयागभूद्रव्याणि आत्मानं यागभुवम् द्रव्याणि च प्रोक्षयतु ॥४८॥

मन्त्रद्वयसाधारणतर्पणमाह—

मन्वोरिति ।

मन्वोरेकेन शतं-
तर्पयेन्मोहनीप्रसूनयुतैर्यः ।

तोयैर्दिनशः प्रातः-
स तु लभते वाञ्छितानयत्नतः कामान् ॥ ४९ ॥

यः पूर्वोक्तमन्त्रयोः एकेनमोहिनीपुष्पमिश्रितैः शक्रासनपद्मासमपुष्पसहितैर्जलैः प्रति प्रत्यहं शतं तर्पयेत् स वाञ्छितान्कामान् अनायासेन प्राप्नोति ॥ ४९ ॥

मन्त्रद्वयसम्बन्धिप्रयोगान्तरमाह—

हुत्वेति ।

हुत्वायुतं हुतशेष-
संपाताज्येन तावदभिजप्तेन ।
भोजयतु स्वाभीकं-
रमणीरमणोऽपि तां स्ववशतां नेतुम् ॥ ५० ॥

घृतेनवह्नावयुतंहुत्वा आहुतिशेषघृतेनमन्त्रजप्तेन रमणी स्ववशतां नेतुं प्रापयितुम् आत्मीयंकामुकंभोजयतु कामुकः स्त्रियं भोजयतु ॥ ५० ॥

अष्टादशार्णेति ।

अष्टादशार्णविहिता-
विधयः कार्या वश्यत आभ्याम् ।
मन्वोरनयोःसदृगन्यो वै-
न मनुस्त्रैलोक्यवश्यकर्मणि जगति ॥ ५१ ॥

अष्टादशाक्षरमन्त्रकथिता वश्यकारिणः प्रयोगा आभ्यां मन्त्राभ्यां कार्याः हि निश्चयेन जगति सकलजगदायत्तताकार्ये अनयोः समानोऽन्यो मन्त्रोनास्ति ॥ ५१ ॥

अत्रैकार्णेति ।

अत्रैकार्णजपादा-
वथवा कृष्णः सवेणुगतिर्ध्येयः ॥

अरुणरुचिराङ्गवेशः-
कन्दर्पो वा सपाशसृणिचापेषुः ॥ ५२ ॥

अत्र समनन्तरोक्तद्वयमध्ये एकाक्षरमन्त्रस्य जपपूजाहोमादौ कृष्णो भावनीयः कीदृक् सवेणुगीतिरिति वंशोत्थगानपरः तथा लोहितमनोहरशरीराभरणः अथवा अत्रैव मन्त्रजपादौ पाशाङ्कुशधनुर्वाणधरः कामदेवोध्येयः मन्त्रस्यादिदेवात्मकत्वादिति भावः ॥५२॥

प्रकृतमुपसंहरति ।

यस्त्विति ।

यस्त्वेकतरं मनुमेतयो-
र्विमलधीः सदा भजति मन्त्री ॥
सोऽमुत्राऽपि च सिद्धिं ।
विपुलामिहातितरामोति ॥ ५३ ॥

योमन्त्री अनयोमन्त्रयोरेकं मन्त्रश्रेष्ठं सदा जपादिभिः सेवते स इहलोके ऽमुत्र च अत्यर्थं विपुलांसिद्धिं प्राप्नोति ॥ ५३ ॥

अथ रुक्मिणीवल्लभमन्त्रमुद्धरति ।

अथेति ।

अथ सत्यशौरिचतृतीयतुर्यकाः ।
शिखिवामनेत्रशशिखण्डमण्डिताः ॥
जयकृष्णयुग्मकनिरन्तरात्मभू-
शिखिशक्तिडास्यवृतसक्तवर्णकाः ॥ ५४ ॥
प्रनिमध्यतो मुदितचेतसे तत-
स्त्यपरक्तदृग्यगुरुमारुताक्षराः ॥
सचतुर्थिकृष्णपदमिक्षुकार्मुको-
दशवर्णकश्च मनुवर्यकस्त्वसौ ॥ ५५ ॥
सलवाधराचलसुतारमाक्षरैः ।
पुटितः क्रमोक्रमगतैः समुद्भवत् ॥

इति दन्तसूर्यवसुवर्ण उद्धृतः ।
कवितानुरञ्जनरमाकरोऽघहृत् ॥ ५६ ॥

सत्योदकारः शौरिर्नकारः च तृतीयतुर्येति जकारः झकारश्च एतेचत्वारोवर्णाः प्रत्येकं शिखीरेफः वामनेत्रमीकारः शशिखण्डोविन्दुः एतैः शोभनाः संवद्धाइत्यर्थः तथाच द्रीं न्रीं ज्रीं झ्रीं इति तदनु जय कृष्णेति त्रिपाठिगोविन्दमिश्रप्रभृतयः वस्तुतः जयकृष्णेति पदस्य युग्मं तदनु निरन्तरेति स्वरूपम् आत्मभूः ककारः शिखीरेफः शक्तिरीकारः तथा क्री स्वरूपं तदनु डस्वरूपं आस्यवृतमाकारः डास्वरूपं सक्त इति स्वरूपं प्रनिमध्यतः प्रनीति अक्षरयोर्मध्ये मुदितचेतसे इति ततो निशब्दान्ते त्येति स्वरूपं तदनु पस्वरूपं रक्तोरेफः हक् इकारः प्रथमाऽतिक्रमे कारणाभावात् ह्रस्व इकारो लभ्येत तथा च प्रिइति स्वरूपं ततो य इति स्वरूपं गुरुराकारः या इति स्वरूपं तदनु मारुतोयकारः तदनु सचतुर्थिकृष्णपदं कृष्णायेति स्वरूपं तदनु इक्षुकार्मुकः कामवीजं तदनु पूर्वोक्तदशाक्षरमन्त्रः तदनु लघोविन्दुः तत्सहिता धरा ऐकारऐं इति स्वरूपम् अचलः पर्वतः तत्सुता पार्वती भुवनेश्वरीबीजमित्यर्थः रमाश्रीवीजम् एभिस्त्रिभिर्वीजैर्मन्त्रान्ते प्रतिलोमपठितैः ऐंह्रीं श्रीं अन्ते श्रींह्रींऐं इति समुद्गवत् सम्पुटवत् पुटितोऽयं द्विपञ्चाशद्वर्णो मन्त्रः सिद्धो भवति ।

मन्त्रवर्णसंख्यामाह—

इतीति ।

दन्त ३२ सूर्य १२ वसु ८ एभिर्मिलितैः संख्या द्विपञ्चाशद्वर्णात्मको मन्त्रो भवतीत्यर्थः कीदृशः कवितालोकानुरागलक्ष्मी सम्पादकः तथाऽघहृत्पापहर्त्ता ॥ ५४ ॥ ५५ ॥ ५६ ॥

अस्य मन्त्रस्य ऋष्यादिकमाह—

मुखवृत्तेति ।

मुखवृत्तनन्दयुतनारदो मुनिः ।
छन्द उक्तममृतादिकं विराट् ॥

त्रिजगद्विमोहनसमाह्वयो हरिः ।
खलु देवताऽस्य मुनिभिः समीरिता ॥ ५७ ॥

मुखवृत्तमाकारः नन्देति स्वरूपम् आभ्यां युतो नारदः तथाच आनन्दनारदऋषिः अमृतादिकं विराट् छन्दस्त्रैलोक्यमोहनोहरि र्देवता नारदादिभिर्मुनिभिः कथिता ॥ ५७ ॥

अङ्गविधिंदर्शयति ।

वसुमित्रेति ।

वसुमित्रभूधरगजात्मदिङ्मयै-
र्मनुवर्णकैस्त्रिपुटसंस्थितैः पृथक् ॥
निजजातियुङ्निगदितं षडङ्गकम् ।
क्रिययैव तत खलु जनानुरञ्जनम् ॥ ५८ ॥

वसुः ८ मित्रः १२ भूधरः ७ गजः आत्मा १ दिक् १० एतत्सङ्ख्याकैर्मन्त्राक्षरैस्त्रिपुट्संस्थितैः तथाच ऐं ह्रीं श्रीं द्रीं ध्रीं र्ह्रीं क्ष्रीं जयकृष्ण ऐं ह्रीं श्रीं हृदयानमः ऐं ह्रीं श्रीं जयकृष्ण-निरन्तरक्रीडासक्त ऐं ह्रीं श्रीं शिरसेस्वाहा इत्यादिक्रिययैव षडङ्गक्रिययैव सर्वजनानुरागं जनयति ॥ ५८ ॥

न्यासमाह—
अथेति ।

अथ संविशोध्य तनुमुक्तमार्गतः ।
विरचय्य पीठमपि च स्ववष्मणा ॥
करयोर्दशाक्षरविधिक्रमान्न्यसेत् ।
स षडङ्गसायकमनङ्गपञ्चकम् ॥ ५९ ॥

अथानन्तरं तनुंशरीरम् उक्तमार्गतः पूर्वोक्तभूतशुद्ध्याःप्रकारेण संशोध्याऽनन्तरं स्ववष्मर्णा स्वशरीरेण पीठमारचय्य करयोः करयुगलेदशाक्षरोक्तप्रकारेण षडङ्गम् अङ्गषट्कं सायकान् च शोषणादीन् वाणान् अनङ्गपञ्चकं कामवीजमन्मथकन्दर्पमकरध्वज-मनोभूतसंज्ञकं कामपञ्चकं न्यसेत् ॥ ५९ ॥

इममेवार्थं विविच्य दर्शयति—

मनुनेति ।

मनुना त्रिशो न्यसतु सर्वतस्तनौ ।
स्मरसम्पुटैस्तदनु मातृकाक्षरैः ॥
दशतत्वकादिदशवर्णकीर्त्तितं-
त्वथ मूर्तिपञ्जरवसानमाचरेत् ॥ ६० ॥

मनुना मूलमन्त्रेण पूर्वं शरीरे त्रिव्यापकङ्कुर्यात् तदनन्तरं प्रतिवर्णं कामवीजपुटितैर्मातृकाक्षरैः त्रिशो न्यसतु दशवर्णकीर्तितं दशाक्षरोक्तदशतत्वादिकान् न्यसेत् तत्वन्यासादि मूर्त्ति-पञ्जरान्तं विन्यस्य ॥ ६० ॥

सृजतिस्थिती दशषडङ्गसायकान् ।
न्यसतात्ततोऽन्यदखिलं पुरोक्तवत् ॥
प्रविधाय सर्वभुवनैकसाक्षिणं-
स्मरतान्मुकुन्दमनवद्यधीरधीः ॥ ६१ ॥

सृष्टिस्थिती समाचरेत् दशाङ्गानि षडङ्गानि वाणांश्च देहे विन्य-सेत् तदनन्तरम् आत्मार्चनाद्यखिलं पूर्ववत् कृत्वा सकललोकद्रष्टा-रं श्रीकृष्णं स्मरतात् चिन्तयतु निर्मलास्थिराबुद्धिर्यस्य स तथा तादृशः साधकः ॥ ६१ ॥

ध्यानमाह—

अथेति ।

अथ भूधरोदधिपरिष्कृते महो-
न्नतशालगोपुरविशालवीथिके ॥
घनचुम्ब्युदग्रसितसौधसङ्कुले ।
मणिहर्म्यविस्तृतकपाटवेदिके ॥ ६२ ॥

अथानन्तरं स्वकेपुरे मणिण्डपे सुरपादपस्य कल्पवृक्षस्या ऽधो मणिमयभूतले परिस्फुरत् पृथुसिंहवक्त्रचरणाम्बुजासने स्थूलसिंह-

मुखाकारपादान्वितपीठपद्मासने समुपाविष्टमच्युतम् अभिचिन्तयेत्। कीदृशेपुरे भूधराः पर्वताः उदधिः समुद्रः एतैः परिष्कृतेवेष्टिते तथा महोन्नतः अत्युच्चः शालः प्रकारोगोपुरं बहिर्द्वारं च यत्र तस्मिन् तथा विशालामहती वीथिका पन्थाः यत्र तत्र कर्मधारयः तथा मेघस्पर्शिअतिशुद्धधवलगृहव्याप्ते तथा मणिमयगृहे विस्तीर्णाः कपाटाः तथा वेदिका परिष्कृतभूमिर्यत्र तत्र ॥ ६२ ॥

पुनः कीदृशेपुरे—

द्विजभूपविट्चरणजन्मनां गृहै-
र्विविधैश्च शिल्पिजनवेश्मभिस्तथा ॥
इभसप्त्युरभ्रखरधेनुसैरिभ-
च्छगलालयैश्च लसितैः सहस्रशः ॥ ६३ ॥

सहस्रशोलोकैर्ब्राह्मणक्षत्रियवैश्यशूद्राणां नानाप्रकारगृहैः तथा शिल्पिजनानां गृहैस्तथा हस्त्यश्वमेषगर्दभधेनुमहिषच्छगलानां गृहैः शोभिते ॥ ६३ ॥

पुनः कीदृशे—

विविधापणाश्रितमहाजनाहृत-
क्रयविक्रयद्रविणसञ्चयाश्चिते ॥
जनमानसाहृतिविदग्धसुन्दरी-
जनमन्दिरैः सुरुचिरैश्च मण्डिते ॥ ६४ ॥

नानाप्रकारविपणिसमाश्रिते महाजनाहृतक्रयविक्रयद्राविणसंचयव्याप्ते

पुनः कीदृशे

जनानां चित्तापहरणेचतुराः येवेश्याजनास्तेषां गृहैः शोभमानैरलंकृते ॥ ६४ ॥

पुनः कीदृशेपुरे।

पृथुदीर्घिकेति।

पृथुदीर्घिकाविमलपाथसिस्फुर-
द्विकचारविन्दमकरन्दलम्पटैः ॥

वरहंससारसरथाङ्गनामभि-
र्विहगैर्विघुष्टककुभि स्वके पुरे ॥ ६५ ॥

स्थूलसरोवरनिर्म्मलोदके देदीप्यमानविकासितकमलमकरन्दाख्यरसलोलुपैः श्रेष्ठहंससारसचक्रवाकसंज्ञकैः पक्षिभिर्ध्वनिता दिशो यस्मिन् ॥ ६५ ॥

पुनः कीदृशेमणिमण्डपे—

पुनः कीदृशे ।

सुरपादपैः सुरभिपुष्पलोलुप-
भ्रमराकुलैर्विविधकामदैर्नृणाम् ॥
शिवमन्दमारुतचलच्छिखैर्वृते-
मणिमण्डपे रविसहस्रसप्रभे ॥ ६६ ॥

कल्पवृक्षैः सुगन्धिपुष्पलुब्धभ्रमरव्याप्तैः मनुष्याणां विविधकामदैः शुभमन्दमारुतचलदग्रभागैः तैर्वेष्टिते ।

सूर्यसहस्रसमानप्रभे ॥ ६६ ॥

पुनः कीदृशे—

मणीति ।

मणिदीपिकानिकरदीपितान्तरे ।
तनुचित्रविस्तृतवितानशालिनि ॥
ललिते पिकस्वराविचित्रदामाभिः ।
सुसुगन्धि गन्धसलिलोक्षितस्थले ॥ ६७ ॥

मणिरेवदीपिका तस्याः समूहैः प्रकाशितमध्यभागे ।

पुनः कीदृशे

सूक्ष्मविचित्रविस्तीर्णचन्द्रातपयुक्ते ।

पुनः कीदृशे

विकसितनानाप्रकारपुष्पमालाभिः शोभिते अतिसुरभिसलिलसिक्तस्थाने ॥ ६७ ॥

पुनः कीदृशे ॥

प्रमदेति—

प्रमदाशतैर्मदविघूर्णितेक्षणै-
र्मदजालसैः करविलोलचामरैः ॥
अभिसेविते स्खलितमञ्जुभाषितैः ।
स्तनभारभङ्गुरकृशावलग्नकैः ॥ ६८ ॥

स्त्रीशतैर्मदविघूर्णितनेत्रैर्मदजनिताऽलस्यसहितैः हस्तस्थित-चञ्चलचामरैः ईषत्स्खलितमनोहरवचनैः स्तनभारनम्रसूक्ष्ममध्यप्रदेशैः परितः सेविते ॥ ६८ ॥

कथंभूतस्य सुरपादपस्य—

अविरामधारमणिवर्य्यवर्षिणः ।
श्रमहानिदामृतरसच्युतोऽप्यधः ॥
सुरपादपस्य मणिभूतलोल्लसत्-
पृथुसिंहवक्त्रचरणाम्बुजासने ॥ ६९ ॥

अविश्रान्तमणिश्रेष्ठधारावर्षिणः ।
पुनः कीदृशस्य ।
श्रमहानिकरामृतरसस्राविनः ॥ ६९ ॥
कीदृशमच्युतम्—

अभिचिन्तयेत्सुखनिविष्टमच्युतं-
नवनीलनीररुहकोमलच्छविम् ॥
कुटिलाग्रकुन्तललसत्किरीटकं-
स्मितपुष्परत्नरचितावतंसकम् ॥ ७० ॥

नूतननीलोत्पलरम्यकान्तिम् ।
पुनः कीदृशं—
कुटिलाग्रकेशेषुस्फुरत् किरीटं यस्यतम् ।
पुनः कीदृशं ।
स्मितम् ईषद्विकसितं पुष्पं रत्नानि च तैरचितोऽवतंसो येनतम् ॥ ७० ॥

सुललाटमुन्नसमुदञ्चितभ्रुवं-
विपुलारुणायतविलोललोचनम् ॥
मणिकुण्डलास्रपरिदीप्तगण्डकं-
नवबन्धुजीवकुसुमारुणाधरम् ॥ ७१ ॥

तथा शोभमानललाटं—
तथा उच्चनासिकम् उद्गच्छद्भ्रूलताकं
तथा स्थूलारुणवर्णदीर्घचञ्चलनयनं तथा मणिमयकुण्डलकिरणपरिशोभितगण्डस्थलं तथा नूतनबन्धुजीवपुष्पसदृशाऽरुणाधरम् ॥ ७१ ॥

पुनः कीदृशं—

स्मितेति ।

स्मितचन्द्रिकोज्ज्वलितदिङ्मुखं स्फुर-
त्पुलकश्रमाम्बुकणमण्डिताननम् ॥
स्फुरदंशुरत्नगणदीप्तभूषणो-
त्तमहारदामभिरुपस्कृतांसकम् ॥ ७२ ॥

हासचन्द्रकिरणधवलीकृतदिङ्मुखं तथा स्फुरद्रोमाञ्चजन्यप्रस्वेदविन्दुशोभितवदनम् ।

पुनः कीदृशं
स्फुरद्भिर्दीप्यमानकिरणरत्नसमूहप्रकाशमानभूषणश्रेष्ठहारमालाभिःशोभितस्कन्धम् ॥ ७२ ॥

घनसारकुङ्कुमविलिप्तविग्रहं-
पृथुदीर्घषड्द्वयभुजाविराजितम् ॥
तरुणाब्जचारुचरणाब्जमञ्जो-
न्मथिताङ्गभङ्गकराम्बुजद्वयम् ॥ ७३ ॥

पुनश्चन्दनकुङ्कुमाभ्यां परिलिप्तशरीरं पुनः स्थूलदीर्घद्वादश-

हस्तै विराजितं तथा नूतनारुणवर्णपद्मसदृशचरणपद्मं पुनः कामपी- डितदेहं पुनः स्वाङ्के आरोपितहस्तद्वयम् ॥ ७३ ॥

स्वाङ्कस्थभीष्मकसुतोरुयुगान्तरस्थम् ।
तां तप्तहेमरुचिमात्मभुजाम्बुजाभ्याम् ॥
श्लिष्यन्तमार्द्रजघनामुपगूहमाना-
मात्मानमायतलसत्करपल्लवाभ्याम् ॥ ७४ ॥

पुनः स्वाङ्के स्थितताया रुक्मिण्या ऊरुद्वयाभ्यन्तरे विद्यमानं पुन- स्तां रुक्मिणीं तप्तसुवर्णकान्तिं स्वीयहस्तपद्माभ्यामालिङ्गन्तं की- दृशीं ताम् आर्द्रजघनां पुनरात्मानं श्रीकृष्णं दीर्घमनोहरपाणिपल्ल- वाभ्याम् आलिङ्गन्तीम् ॥ ७४ ॥

आनन्दोद्रेकनिघ्नां मुकुलितनयनेन्दीवरां स्रस्तगात्रीं-
प्रोद्यद्रोमाञ्चसान्द्रश्रमजलकणिकामौक्तिकालंकृताङ्गीम्
आत्मन्यालीनबाह्यान्तरकरणगणामङ्गकैर्निस्तरङ्गै-
र्मज्जन्तीं लीननानामतिमतुलमहानन्दसन्दोहसिन्धौ ७५

पुनः स्वात्मानन्दोद्रेकव्याप्तां पुनः मुद्रितनयननीलोत्पलां पुनः प्रोद्यत्तनुपुलकजन्यनिविडप्रस्वेदबिन्दुरूपमौक्तिकशोभितदेहां पुनः आत्मनि श्रीकृष्णे सम्यग्विलीनबाह्याभ्यन्तरेन्द्रियसमूहां पुनर्व्या- पाररहितैः शरीरावयवैरतिशयितमहानन्दसमूहसागरेनिमग्नां पुनः विगतचञ्चलमतिम् ॥ ७५ ॥

पुनः कीदृशं परमेश्वरम्—

सत्याजाम्बवतीभ्यां-
दिव्यदुकूलानुलेपनाभरणाभ्याम् ॥
मन्मथशरमथिताभ्यां-
मुखकमलचञ्चललोचनभ्रमराभ्याम् ॥ ७६ ॥

सत्यभामाजाम्बवतीभ्यामालिङ्गितं कथंभूताभ्याम् उत्कृष्टानि प- ट्टवस्त्रानुलेपनाभरणानि ययोस्ताभ्यां पुनः कामशरपीडिताभ्यां पुनः

कृष्णमुखविषयकचञ्चलनेत्रभ्रमराभ्याम् ॥ ७६ ॥

भुजयुगलाश्लिष्टाभ्यां-
श्यामारुणललितकोमलाङ्गलताभ्याम् ॥
आश्लिष्टमात्मदक्षिण-
वामगताभ्यां करोल्लसत्कमलाभ्याम् ॥ ७७ ॥

पुनः परमेश्वरस्य भुजयुगलेनाऽऽलिङ्गिताभ्यां—

यथाक्रमनीलारुणवर्णमनोहरे कोमले चाऽङ्गलते ययोस्ताभ्यां पुनः परमेश्वरस्य दक्षिणवामगताभ्यां पुनः पाणिस्फुरितपद्मा-भ्याम् ॥ ७७ ॥

पुनः कीदृशम् ।

पृष्ठगया कलिन्दसुतया करकमलयुजा ।
सम्परिरब्धमञ्जनरुचा मदनमथितया ॥
पद्मगदारथाङ्गदरभृद्भुजयुगलं-
दोर्द्वयसक्तवंशविलसन्मुखसरसिरुहम् ॥ ७८ ॥

परमेश्वरपृष्ठदेशवर्त्तिन्या यमुनयाहस्तधृतकमलया समालि-ङ्गितं किम्भूतया श्यामया पुनः कामपीडितया ।

पुनः कीदृशं परमेश्वरं

पद्मगदाशङ्खचक्रयुक्तहस्तचतुष्टयं हस्तद्वयधृतवंशविलसन्मुख-कमलम् ॥ ७८ ॥

दिक्ष्विति ।

दिक्षु वहिः सुरर्षिपतिभिः खचरपरिवृढै-
र्भक्तिभरावनम्रतनुभिःस्तुतिमुखरमुखैः ॥
सन्ततसेव्यमानममनोवचनविषयक-
मर्थचतुष्टयप्रदममुंत्रिभुवनजनकम् ॥ ७९ ॥

तृतीयपटलोक्तक्रमेणेत्यर्थः ।

पुनः वहिर्दिक्षु देवर्षियतिभिः खेचरमुख्यैर्भक्त्यातिशयनम्रदेहैः ।

परिवृढैः प्रधानैः स्तुतिभिः वाचालवदनैर्निरन्तरं सेवितं पुनः मनसो-
वाचामगोचरं पुनर्धर्म्मार्थकाममोक्षफलचतुष्टयप्रदं पुनस्त्रैलो-
क्यजनकम् ॥ ७९ ॥

सान्द्रानन्दमहाब्धिमग्नममले धाम्नि स्वके ऽवस्थितम् ।
ध्यात्वैवं परमं पुमांसमनघात्संप्राप्य दीक्षां गुरोः ॥
लब्ध्वाऽमुं मनुमादरेण सितधीर्लक्षं जपेद्योषिताम् ।
वार्त्ताकर्णनदर्शनादिरहितो मन्त्री गुरूणामपि ॥८०॥

पुनः निविडानन्दमहासमुद्रमग्नम् ।

स्वीयेनिर्मलेतेजसितद्रूपेणाऽवस्थितम् एवमुक्तरूपं परमेश्वरं
विचिन्त्य निष्पापात् गुरोर्दीक्षामन्त्रोपदेशविधिं प्राप्याऽमुंमन्त्रं ल-
ब्ध्वा तीक्ष्णबुद्धिः आदरात् लक्षमेकं जपेत् ।

कीदृशः साधकः स्त्रीणां वृद्धानामपि कथाश्रवणानिरीक्षणपराङ्-
मुखः ॥ ८० ॥

होमं सेवां चाऽऽह—

जुहुयादिति ।

जुहुयाच्च दशांशकं हुताशे ।
ससिताक्षौद्रघृतेन पायसेन ॥
प्रथमोदितपीठवर्यकेऽमुं-
प्रयजेन्नित्यमनित्यताविमुक्त्यै ॥ ८१ ॥

हुताशे वह्नौ दशांशकम् । अयुतमेकं शर्करामधुघृतयुक्तेन परमा-
न्नेन जुहुयात् किञ्च पूर्वोक्तदशाष्टादशाक्षरकथिते पीठश्रेष्ठे नित्यममुं
यजेत् किमर्थम् अनित्यः संसारस्तस्य परिहरणाय ॥ ८१ ॥

आरभ्याऽथ विभूतिन्यासक्रमतः शरान्तमभ्यर्च्य ।
मूर्त्याद्यङ्गान्तं चात्मानं विंशत्यर्णोदितयन्त्रवरे ॥८२॥
मध्येबीजं परितो वरुणेन्दुयमेन्द्रदिक्षु संलिख्य ॥
बीजचतुष्कं तदपि चत्वारिंशद्भिरक्षरैर्द्व्यधिकैः ॥८३॥

शिष्टैः प्रवेष्टय शिवहरि-
वस्वाद्यग्निष्वथ क्रमाद्विलिखेत् ॥
वाङ्मायाश्रीमन्त्रास्तद्वद्रक्षोम्बुपानिलाग्निषु च॥८४॥
शेषं पूर्वोदितवद्विधाय पीठं यथा वदभ्यर्च्य ॥
सङ्कल्प्य मूर्त्तिमत्रा-
ऽऽवाह्याऽभ्यर्चयतु मध्यवीजे तम् ॥ ८५ ॥

आरभ्येत्यादि विभूति पञ्जरमारभ्य
न्यास क्रमेणवाणपर्यन्तं पूजयित्वा-
मूर्त्तिन्यासमारभ्याऽङ्गन्यासपर्यन्तं चात्मरूपं सम्पूज्य पूर्वोक्तविंशत्यक्षरमन्त्रोक्तयन्त्रश्रेष्ठकर्णिकामध्यस्थितवह्निपुरयुगमध्ये मध्यमवीजमध्ये वीजमिति पाठस्वरसात् हृल्लेखावीजमिति रुद्रधरगोविन्दमिश्रप्रभृतयः परस्थमध्यमवीजमिति लगति मध्यमवीजंवाग्भवादिवीजत्रयमध्यस्थितंमारवीजमितिपाठेकामवीजं विलिख्य तत्परितश्च पश्चिमोत्तरपूर्वदक्षिणदिक्षु वीजचतुष्कं द्रींत्रीं जीं झीं इति वीजचतुष्टयं विलिख्य तदपिवीजचतुष्टयं द्विचत्वारिंशत्जपादिस्वाहान्तैः शिष्टैर्मन्त्राक्षरैरुपरिवेष्टयेत् अनन्तरं शिवईशानः हरिरिन्द्रः पूर्वादिदिगित्यर्थः वसुराग्निः आग्नेयादिक एवं नैर्ऋतीवारुणीवायवीदिग् एतेषुकोणेषु क्रमेणवाग्भवभुवनेश्वरीश्रीवीजानि त्रिरावृत्य विलिखेत्

अवशिष्टं पीठविधानं पूर्ववत समाप्यपीठं यथावत् पूजयित्वा-तत्रपीठेकर्णिकामध्यस्थितकामवीजे रुक्मिणीवल्लभमूर्त्ति सङ्कल्प्य ध्यात्वातमावाह्य पूजयेत् ॥ ८२ ॥ ८३ ॥ ८४ ॥ ८५ ॥

मुखदक्षसव्यपृष्ठगवीजेष्वर्च्यास्तु शक्तयः क्रमशः।
रुक्मिण्याद्याः षट्स्वथ-
कोणेष्वङ्गानि केशरेषु शरान् ॥ ८६ ॥

अनन्तरंदेवस्य सन्मुखदक्षिणवामपृष्ठप्रदेशगतेषु वीजचतुष्टयेषु रुक्मिण्याद्याः शक्तयः पूज्याः षट्कोणेषु अङ्गानि केशरेषु शरान् पूजयेत् ॥ ८६ ॥

लक्ष्म्याद्या दलमध्येष्वग्न्यादिषु तद्बहिर्ध्वजप्रमुखान्।
अग्रेकेतुं श्यामं पृष्ठेविपमरुणममलरक्तरुची ॥८७॥
पार्श्वद्वये निधीशौ-
सन्ततधाराभिवृष्टधनपुञ्जौ ॥
हेरम्बशास्तृदुर्गाविष्वक्सेनान् विदिक्षु वह्न्यादि ॥८८॥
विद्रुममरकतदूर्वास्वर्णाभान् बहिरथेन्द्रवज्राद्यान्॥
यजनविधानमितीरित-
मावृतिसप्तकयुतं मुकुन्दस्य ॥ ८९ ॥

अग्न्यादिपत्रमध्येषु लक्ष्म्याद्याः पूज्याः।

यत्रबहिर्भागेध्वजप्रभृतीन् पूजयेत् अनन्तरं देवस्य सन्मुखे श्यामवर्णकेतुनामानंगणं पूजयेत्देवपृष्ठभागे अरुणवर्णं गरुडं पूजयेत् देवपार्श्वद्वयेनिर्मलरक्तरुचीनिधीश्वरौ पूज्यौ कद्दिशौनिरन्तरधाराभिवृष्टधनसमूहौ।

वन्ह्यादिविदिक्षुहेरम्बादीन् प्रवालादिवर्णान् पूजयेत् अनन्तरं वाहिर्दिक्षु इन्द्रादिलोकपालान् तथा वज्राद्यायुधानि पूजयेत् इति पूर्वोक्तप्रकारेण मुकुन्दस्य श्रीकृष्णस्याऽऽवरणसप्तकं पूजाविधानं कथितम् इति ॥ ८७ ॥ ८८ ॥ ८९ ॥

इतीति—

इत्यर्चयन्नच्युतमादरेण ।
योऽमुं भजेन्मन्त्रवरं जितात्मा ॥
सोऽभ्यर्च्यते दिव्यजनैर्जनानां-
हृन्नेत्रपङ्केरुहतिग्मभानुः ॥ ९० ॥

इति अमुनाप्रकारेण यो जितेन्द्रियो अच्युतं कृष्णं भक्त्या पूजयन् अमुंमन्त्रश्रेष्ठं सेवते सपुरुषः सुरैरपि पूज्यते कीदृशः लोकानां हृदयपद्मलोचनपद्मयोः सूर्यः सर्वजनवशीकरणमन्त्रः समर्थइत्यपि पाठः ॥ ९० ॥

सितेति—

सितशर्करोत्तरपयःप्रतिपत्त्या ।
परितर्पयेद्दिनमुखे दिनशस्तम् ॥
सलिलैः शतं शतमखश्रियमेष-
स्वाविभूत्युदन्वति करोत्युदविन्दुम् ॥ ९१ ॥

सितशर्कराप्रधानप्रतिपत्त्या दुग्धबुद्ध्या जलैरेव दिनमुखे प्रातःकाले प्रतिदिनं शतक्रतवस्तं तर्पयेत् अनन्तरं साधकः स्वाधिपत्यसमुद्रे इन्द्रस्य लक्ष्मीं जलविन्दुवत् करोति ॥ ९१ ॥

विदलदिति—

विदलद्दलैः सुमनसः सुमनोभि-
र्घनसारचन्दनवहुद्रवमग्नैः ॥
मनुनाऽमुना हवनतोऽयुतसंख्यं-
त्रिजगत् प्रियः स मनुवित्कविराट् स्यात् ॥ ९२ ॥

अनेनमन्त्रेण सुमनसो जातीमालतीनामधेयस्य सुमनोभिः पुष्पैः विकसि ।

तैः कर्पूरयुक्तचन्दनस्य बहुद्रवव्याप्तैरयुतसंख्यं हवनतोऽयुतहोमेन सः मन्त्री त्रैलोक्यस्य प्रियः कविश्रेष्ठश्च भवति ॥ ९२ ॥

ध्यानेति—

ध्यानादेवाऽस्य सद्यस्त्रिदशमृगदृशोवश्यतांयान्त्यवश्यं-
कन्दर्पार्त्ताजपाद्यैः किमथ न सुलभं मन्त्रतोऽस्मान्नरस्य ॥
स्पर्द्धामुद्धूय चित्रं महदिदमपि नैसर्गिकींशश्वदेनं-
सेवेतेमन्त्रिमुख्यंसरसिजनिलयाचाऽपिवाचामधीशा९३

अस्यरुक्मिणीवल्लभस्य ध्यानात् शीघ्रंत्रिदशमृगदृशः देवाङ्गना-अवश्यं वश्यतामायत्तत्तां प्राप्नुवन्ति कथंभूताः कामपीडिता अथानन्तरं जपहोमादिना ऽस्मात् मन्त्रात् साधकस्यं किं न सुलभम् अपितु सर्वमेवसुलभमित्यर्थः किञ्चेदमपि महच्चित्रं यत्सरसिज-

निलया लक्ष्मीः वाचामधीशासरस्वती च स्वाभाविकीमसूयांत्य॰
क्त्वा नित्यमेनंसाधकश्रेष्ठं सेवेते ॥ ९३ ॥

आधीति—

आधिव्याधिजरापमृत्युदुरितैर्भूतैः समस्तैर्विषै-
र्दौभाग्येन दरिद्रतादिभिरसौ दूरं विमुक्तश्चिरम् ॥
सत्पुत्रैः सुसुतासुमित्रनिवहैर्जुष्टोखिलाभिः सदा ।
सम्पद्भिः परिजुष्ट इडितयशा जीवेदनेकाः समाः॥९४॥

किञ्च मनोदुःखरोगजरापमृत्युशोकशून्यः सकलप्राणिभिर्विषैः तथा दुरदृष्टेन तथा दरिद्रतादिभिरतिशयेन परित्यक्तो बहुकालं॰ व्याप्यविशिष्टपुत्रसमेतः सत्पुत्रीमित्रसमूहेनसेवितः सदासमृद्धः ईडितयशाः स्तुतयशाः असौसाधकः अनेकाः समा हायनानि जी॰ वेत् ॥ ९४ ॥

मन्त्रान्तरेभ्योऽस्याऽतिशयित्वमाह—

अखिलेति ।

अखिलमनुषु मन्त्रा वैष्णवा वीर्यवन्तो ।
महिततरफलाढ्यास्तेषु गोपालमन्त्राः ॥
प्रबलतर इहैषोऽमीषु संमोहनाख्यो-
मनुरनुपमसम्पत्कल्पनाकल्पशाखी ॥ ९५ ॥

सर्वेषुमन्त्रेषुवैष्णवमन्त्रा अतिशयेन सवीर्याः तेष्वपिवैष्णव॰ मन्त्रेषुगोपालमन्त्रा अतिपूजितफलयुक्ताः तेष्वपिगोपालमन्त्रेषु॰ एषसंमोहनाख्यमन्त्रः प्रबलतरः प्रकृष्टबलयुक्तः पुनः निरुपमैश्वर्य॰ दानैककल्पवृक्षः ॥ ९५ ॥

मन्विति—

मनुमिममतिहृद्यं यो भजेद्भक्तिनम्रो-
जपहुतयजनाद्यैर्धर्मनिष्ठान्मन्त्रिमुख्यः ।
त्रुटितसकलकर्मग्रन्थिरुद्बुद्धचेताः ।
व्रजति स तु पदं तन्नित्यशुद्धं मुरारेः ॥ ९६ ॥

योमन्त्रिमुख्यः साधकश्रेष्ठः ध्यानयुक्तः भक्त्या आराध्यत्वज्ञानेन इमं मन्त्रं मनोहरं जपध्यानहोमादिभिर्भजेत् स मुरारेस्तत्प्रसिद्धं पदं व्रजति प्राप्नोति मुरा अविद्या तस्यानाशकस्य पदं कीदृशं पदम् अविनाशि सर्वकालुष्यरहितं स कीदृशः विनाशितसकलकर्मबन्धनः पुनः कीदृशः उद्बुद्धचेता वस्तुग्रहणोन्मुखचित्तः ॥ ९६ ॥

अथ योगमाह—

अङ्गीकृत्येति ।

अङ्गीकृत्यैकमेषां मनुमथ जपहोमार्चनाद्यैर्मनूना-
मष्टाङ्गोत्सारितारिः प्रमुदितपरिशुद्धप्रसन्नान्तरात्मा ॥
योगीयुञ्जीतयोगान्समुचितविहृतिस्वप्नबोधाहृतिःस्यात्
प्रागास्यश्चासने स्वे सुमृदुनि ससुखं मीलिताक्षो नि-
विष्टः ॥ ९७ ॥

एषांमनूनां मन्त्राणां मध्ये एकं मनुं मन्त्रजपहोमादिभिःस्वीकृत्यवशीकृत्य अष्टाङ्गेन यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिलक्षणेन उत्सारितास्त्यक्ताः कामक्रोधादयोऽरयो येन स तथा हर्षितनिर्मलप्रसन्नचित्तो योगी प्राग्वदनः सन् योगान् चित्तवृत्तिनिरोधादीन् करोतु कीदृशोयोगी यथोचितविहारनिद्राप्रबोधाहारः पुनः स्वकीयेसुकोमले आसनेसमुपविष्टः पुनः कीदृशः सुखेनाऽनायासेनसंमीलितेमुद्रिते अक्षिणीयनसः ॥ ९७ ॥

विश्वमिति ।

विश्वं भूतेन्द्रियान्तःकरणमय-
मिनेन्द्वग्निरूपं समस्तं-
वर्णात्मैतत् प्रधानेकल नयनमये वीजरूपे ध्रुवेण ॥
नीत्वातत्पुंसि विन्द्वात्मनि तमपि-
परात्मन्यथो कालतत्वे ।
तं वै शक्तौ चिदात्मन्यपि नयतु च तां-
केवले धाम्नि शान्ते ॥ ९८ ॥

एतद्वर्णात्मकंसमस्तं विश्वंभूतेंद्रियान्तःकरणरूपं सूर्येन्द्वग्निरूपं प्रधानेप्रकृतिरूपे कलनयनरूपेकामवीजे प्रणवेन नीत्वा तत्र विलीनं विचिन्त्य तत्कामवीजं विन्द्वात्मनिप्रसिद्धेऽनुस्वाराख्ये तमपिविन्द्वात्मानं नादाख्येकालतत्वे परमात्मनि संहरेत् तमपिकालतत्वं चिद्रूपायां शक्तौ संहरेत्तामपि शक्तिं केवलेतेजोमयेस्वप्रकाशेधाम्नितेजसिशान्तेसर्वोपद्रवरहिते नयतु ॥ ९८ ॥

कीदृशे—

निर्द्वन्द्वे निर्विशेषे निरतिशय-
महानन्दसान्द्रेऽवसानाऽ-
पेतेऽर्थे कृष्णपूर्वामलरहितगिरां-
शाश्वते स्वात्मनीत्थं ॥
संहृत्याऽभ्यस्य वीजोत्तममथ-
शनकैर्लीननिश्वासचेताः ।
प्रक्षीणापुण्यपुण्यो निरुपमपर
संवित्स्वरूपः स भूयात् ॥ ९९ ॥

निर्द्वन्द्वेशीतोष्णादिद्वन्द्वविशेषरहिते विशेषोवैधर्म्यंतद्रहिते अत्यन्तानन्दघने अनन्तेकृष्णगोविन्दादिनिर्मलशब्दानां प्रतिपाद्ये आत्मस्वरूपे इत्थम् अमुना प्रकारेणसंहृत्य संहारं कृत्वा कामवीजं जपन् अथानन्तरं स्वयमेव निश्चलश्वासचित्तोभूत्वा प्रक्षीणपापपुण्यश्च भूत्वा स योगी निरूपमः परमसंविन्मयो भवति ॥ ९९ ॥

मूलेति—

मूलाधारे त्रिकोणे तरुणतरणिभा-
भास्वरे विभ्रमन्तं-
कामं वालार्ककालानलजठर-
कुरङ्गाङ्ककोटिप्रभाभम् ॥
विद्युन्मालासहस्रद्युतिरुचिर-
हसद्बन्धुजीवाभिरामं-

त्रैगुण्याक्रान्तविन्दुं जगदुदय-
लयैकान्तहेतुं विचिन्त्य ॥ १०० ॥

त्रिकोणात्मके मूलाधारे उद्यदादित्यवत् प्रकाशमाने भ्रममाणं-कामवीजं नूतनादित्यप्रलयकालीनवह्निचन्द्रकोटितुल्यकान्ति पुनस्तडिन्मालासहस्रकान्ति पुनः नूतनपुष्पितवन्धूकवन्मनोहरं सत्वादिगुणत्रयेण व्याप्तोऽनुस्वारसंज्ञको विन्दुर्येन तं पुनः विश्वोत्पत्तिनाशैककारणम् ॥ १०० ॥

तस्येति—

तस्योर्द्ध्वे विस्फुरन्तीं स्फुटरुचिरतडित्पुञ्जभाभास्वराभा-
मुद्गच्छन्तींसुषुम्णासरणिमनुशिखामाललाटेन्दुविम्बम्॥
चिन्मात्रांसूक्ष्मरूपां कलितसकलविश्वांकलांनादगम्यां-
मूलं या सर्वधाम्नां स्मरतु निरुपमां हुंकृतोदञ्चितरः१०१

तस्य कामवीजस्यउपरि विन्दुगतकुण्डलिनीं शक्ति दीप्यमानां चिन्तयतु किंभूतां प्रव्यक्तमनोहरविद्युत्सहस्रवत् प्रकाशमानकान्ति पुनः ललाटचन्द्रविम्वान्तं सुषुम्णारन्ध्रं यान्तीं पुनः अनु अनुगता वीजगतविम्वात्मकेवह्निशिखाज्वालायस्यां सा तथातां पुनः किम्भूतां चित्स्वरूपां पुनः दुर्लक्षां पुनराप्तसकलविश्वां पुनः कलारूपां पुनर्नादानुमेयां पुनः सर्वतेजसां मूलभूतां कीदृशोऽधिकारी हुंकारेण उदञ्चित उर्द्ध्वमुत्पाटित इरोवायुरपानाख्यो येनसतथा ॥ १०१ ॥

नीत्वेति—

नीत्वातांशनकैरधोमुखसहस्रारारुणाब्जोदर-
द्योतत्पूर्णशशाङ्कविम्वमसुतः पीयूषधारास्रुतिम् ॥
रक्तां मन्त्रमयींनिपीय च सुधानिस्यन्दरूपां विशे-
द्भूयोप्यात्मनिकेतनं पुनरपि प्रोत्थाप्यपीत्वा विशेत१०२॥

तां कुण्डिलिनीं शक्तिं शनकैर्यथास्यादेवमधोमुखसहस्रदलारुणकमलमध्यद्योतमानपूर्णचन्द्रमण्डलं नीत्वा अस्माच्चन्द्रवि-

स्वात् अमृतधारावृष्टिं रक्तवर्णां वर्णात्मिकाम् अमृतस्वरूपां पाययित्वा आत्मनिकेतनं मूलाधारेप्रवेशयेत् भूयोऽनन्तरमपितथैव तामुत्थाप्यतथा कृत्वा पुनस्तस्यानिजस्थानं प्रापयेदिति ॥ १०२ ॥

एतादृशाभ्यासस्य फलमाह—

य इति ।

योऽभ्यस्यत्यनुदिनमेवमात्मनोऽन्तं-
र्बीजेशं दुरितजरापमृत्युरोगान् ॥
जित्वाऽसौ स्वयमिव मूर्त्तिमाननङ्गः ।
संजीवेच्चिरमलिनीलकेशपाशः ॥ १०३ ॥

यः प्रत्यहमनेन प्रकारेण शरीरमध्येकामबीजमभ्यस्यति आत्मनोऽन्तं मनोलयान्तमिदमभ्यस्यतीतिक्रियाविशेषणम् असौ साधकः दुरितजरापमृत्युरोगान् पराभूय स्वयमेवदेहधारिकन्दर्पो भूत्वा चिरकालं जीवति कीदृशो भ्रमरवर्णवत् श्यामकेशसमूहः ॥ १०३ ॥

स्फुटेति—

स्फुटमधुरपदार्णश्रेणिरत्यद्भुतार्था ।
झटितिवदनपद्माद्विस्फुरत्यस्य वाणी ॥
अपि च सकलमन्त्रास्तस्य सिध्यन्ति मङ्क्षु ।
व्युपरमघनसौख्यैकास्पदं वर्तते सः ॥ १०४ ॥

अस्यसाधकस्यमुखकमलाच्छीघ्रं सरस्वतीप्रभवति किम्भूता प्रव्यक्तमनोहरपदवर्णसमूहात्मिका अत्याश्चर्य्यविषया किन्तु अस्य साधकस्यमङ्क्षुअन्येपिमन्त्राः सिध्यन्ति किञ्च ससाधकः अविश्रान्तनिविडसुखमात्रस्थानं भूत्वा तिष्ठति ॥ १०४ ॥

भ्राम्यदिति—

भ्राम्यन्मूर्त्तिमूलचक्रादनङ्ग-
स्वाभिर्भाभीरक्तपीयूषयुग्भिः ॥

विश्वाकाशं पूरयन्तं विचिन्त्य ।
प्रत्यावेश्यास्तत्र वश्याय साध्याः ॥ १०५ ॥
नार्यो नरो वा नगरी सभापि वा
प्रवेशितास्तत्र निशातचेतसा ॥
स्युः किङ्करास्तस्य झटित्यनारतं
चिराय तन्निम्नधियो न संशयः ॥ १०६ ॥

मूलचक्रान्मूलाधारे अत्रसप्तम्यर्थेपञ्चमी भ्रमणमूर्त्तिकामबीजं स्वकीयाभिर्दीप्तिभिर्लोहिताभृनयुक्ताभिर्ब्रह्माण्डमध्यप्रदेशं पूर्यमाणं ध्यात्वानिशातचेतसा तीक्ष्णमतिना तत्र नारीप्रभृतयः साध्यावश्यार्थं प्रत्यावेश्याः प्रक्षेप्तव्या अनन्तरं तत्र प्रवेशिताः प्रवेशं प्रापिताः स्त्रीप्रभृतयस्तन्निमग्नाधियस्तेनहृतचित्ताः तस्यसाधकस्यशीघ्रंचिरकालमाज्ञाकारिणो भवन्ति नाऽत्रसन्देहः ॥ १०५॥१०६॥

तरणीति—

तरणिदलसनाथे शक्रगोपारुणे यो-
रविशशिशिखिबिम्बप्रस्फुरच्चारुमध्ये ॥
हृदयसरसिजेऽमुं श्यामलं कोमलाङ्ग-
सुसुखमुपनिविष्टं तं स्मरेद्वासुदेवम् ॥ १०७ ॥

तत् द्वादशदलयुक्तेहृदयकमले इन्द्रगोपालाख्योरक्तकीटविशेषः तद्वदरुणे सूर्यवह्निचन्द्रमण्डलशोभितचारुमध्यप्रदेशे अमुंश्यामवर्णं कोमलाङ्गं सुकुमाराङ्गं सुखप्रकारेणोपविष्टं वासुदेवंचिन्तयेत् ॥१०७॥

पादाम्भोजेति—

पादाम्भोजद्वयेऽङ्गुल्यमलकिशलयेष्वावलौ सन्नखाना-
सत्कूर्मोदारकान्तौ प्रपदयुजि लसज्जङ्घिकादण्डयोश्च ॥
जान्वोरूर्वोः पिशङ्गे नववसनवरे मेखलादाम्निनाभौ ।
रोमावल्यामुदारोदरभुवि विपुले वक्षसि प्रौढहारे॥१०८॥

आदिपुंसः श्रीकृष्णस्य पादाम्भोजमारभ्यहसितान्तेषु स्थानेषु-वक्ष्यमाणेषुशनैर्यथा स्यात्तथा इति क्रमतः स्थानक्रमतः स्थानक्रमेण

स्वीयं मनः स्थापयतु तथा पादपद्मद्वये प्रथमं मनःस्थापयेत् तदनन्तरं पूर्वं पूर्वमपोह्याऽपरस्थानेषुमनोनिदध्यात् अङ्गुल्यएवामलकिशलया निर्मलपल्लवास्तेषु तदनु नखानां शोभमानपङ्क्तौ तदनु प्रपदयुजिपादद्वये कीदृशे कूर्मपृष्ठवदुपारिभागे उन्नते तदनु देदीप्यमानजङ्घाद्वये तदनु जानुद्वये ऊरुद्वयेपीतवर्णे नूतनवस्त्रयोः श्रेष्ठे क्षुद्रघण्टिकामालायां नाभिप्रदेशेतन्निष्ठरोमपङ्क्तौ च विपुलोदरस्थानेमहाहारयुक्ते विस्तीर्णे वक्षसि ॥ १०८ ॥

श्रीवत्से कौस्तुभे च स्फुट कमललसद्वद्धहृद्दाम्नि वाहोर्मूले केयूरदीप्ते जगदवनपटौ दोर्द्वये कङ्कणाढ्ये ॥
पाणिद्वन्द्वाङ्गुलिस्थेऽतिमधुररवसंलीनविश्वे च वेणौ।
कण्ठे सत्कुण्डलोस्रस्फुटरुचिरकपोलस्थलद्वन्द्वके च १०

श्रीवत्से विप्रपादावघाततर्जन्योर्द्धरोमात्मके कौस्तुभेहृदयनिविष्टमणिविशेषे विकसितपद्ममालायां केयूरशोभितवाह्वोर्मूले संसाररक्षणदक्षे कङ्कणयुक्तेवाहुद्वये हस्तद्वयाङ्गुलिनिष्ठे अतिमधुरशब्देन मग्नं जगत्रयं येन एवंभूतेवेणौ तदनुकण्ठे रम्यकुण्डलाकिरणप्रकाशितमनोहरकपोलस्थलयुगले ॥ १०९ ॥

कर्णद्वन्द्वे च घोणे नयननलिनयो र्भ्रूविलासे ललाटे।
केशेष्वालोलवर्हेष्वतिसुरभिमनोज्ञप्रसूनोज्ज्वलेषु ॥
शोणे विन्यस्तवेणावधरकिशलये दन्तपङ्क्त्यांस्मिताख्ज्योत्स्नायामादिपुंसः क्रम इति च शनैः स्वंमनः संनिधत्ताम् ॥ ११० ॥

कर्णद्वये नासायुगले नेत्रपद्मद्वये भ्रूविक्षेपे ललाटे चञ्चलमयूरपुच्छयुक्तेषु अतिसुगन्धिमनोहरपुष्पोज्ज्वलेषु केशेषु शोणवर्णे आसेपितवेणौ अधरपल्लवे दन्तपङ्क्त्यां स्मिताख्यज्योत्स्नायां स्मितमाख्यानाम यस्याः तस्यां ज्योत्स्नायां चन्द्रकान्तौ ज्योत्स्नातुल्ये स्मिते ॥ ११० ॥

यावदिति।

यावन्मनोविलयमेति हरेरुदार-

मन्दस्मितेऽभ्यसतु तावदनङ्गबीजम् ॥
अष्टादशार्णमथवाऽपि दशार्णकं वा ।
मन्त्री शनैरथ समाहितमातरिश्वा १११ ॥

हरेरुदारशोभमाने मन्दस्मिते मनो यावत् विलयं विशेषतो लयमेति तावदनङ्गबीजम् अष्टादशार्णं दशार्णं वा प्रजपतु किंभूतः समाहितमातरिश्वा प्रत्याहारीकृतप्राणवायुः ॥ १११ ॥

आरोप्येति ।

आरोप्यारोप्य मनः पदारविन्दादिमन्दहसितान्तम् ।
तत्र विलाप्यक्षीणे चेतसि सुखचित्सदात्मको भवति ११२

मनः पदारविन्दमारभ्य ईषद्धास्यपर्यन्तं समारोप्याऽनन्तरं तत्र विलाप्य लीनं कृत्वा क्षीणे शुद्धे चित्ते सति सुखज्ञानसदात्मको भवति साधकः ॥ ११२ ॥

न्यासेति ।

न्यासजपहोमपूजातर्पणमन्त्राभिषेकविनियोगानाम् ।
दीपिकयैव मयोद्भाषितःक्रमःकृत्स्नमन्त्रगणकथि-
तानाम् ॥ ११३ ॥

कृष्णमन्त्रसमूहकथितानां न्यासजपादीनां क्रमदीपिकयैव क्रमः प्रकाशितः ॥ ११३ ॥

संशयेति ।

संशयतिमिरच्छिदुरा सैषा क्रमदीपिका करेण सद्भिः ।
करदीपिकेव धार्या सस्नेहमहर्निशं समस्तसुखाप्त्यै ११४

सैषा क्रमदीपिका साधुजनैःसस्नेहं यथा स्यात्तथाकरदीपिकेव धार्या किंभूता संशयरूपान्धकारच्छेदयित्री अन्यापि तैलादिस्नेहसहितं यथा स्यात्तथा धार्यते अन्धकारनाशिनी भवति किमर्थं धार्या समस्तसुखप्राप्त्यर्थम् ॥ ११४ ॥

जगदिदमनुविद्धं येन यस्मात्प्रसूते ।
यदनुततमजस्रं पाति चाऽधिष्ठिता यम् ॥

यदुरुमहउदर्चिर्यं विधत्ते च गोपी ।
तममृतसुखबोधज्योतिषं नौमि कृष्णम् ॥ ११५॥

जगदिदमनुविद्धमनुस्यूतं येनज्योतिषा यस्मात्परमेश्वरात् इमं जनलोकं संसाराख्यं प्रसूते प्रसूतिं प्राप्नोतीत्यर्थः यस्मिन्नित्यपि पाठः तथापरमेश्वरम् अधिष्ठातारमाश्रिता सती अनुततं विस्तृतं जगत् अजस्रं सर्वदा पातिरक्षति यस्य परमेश्वरस्य उरुविपुलं महःतेजः ततउदर्चिस्तत्तेजसाउदितदीप्तिः सती यं प्रतिबिम्बरूपेण धत्ते तमुक्तानन्दं स्वप्रकाशंनौमिस्तौमि ॥ ११५ ॥

यश्चक्रमिति—

यश्चक्रं निजकेलिसाधनमधिष्ठानस्थितोऽपि प्रभु-
र्दत्तं मन्मथशत्रुणाऽवनकृते व्यावृत्तलोकार्त्तिकम् ॥
धत्तेदीप्तनवेन शोभनमघापेतात्तमायं ध्रुवं-
वन्देकायविमर्दनं वधकृतां भुञ्जद्युकं यादवम् ॥११६॥

इति श्रीमन्महामहोपाध्यायश्रीकेशवकाश्मीरिभट्ट-
गोस्वामिविरचितायां क्रमदीपिकायामष्टमः पटलः॥८॥

यः परमेश्वरः श्रीकृष्णः वक्ष्यमाणलक्षणं चक्रंधत्ते तं वन्देइत्यन्वयः कथंभूतं चक्रं निजकेलिसाधनं निजयुद्धक्रीडाकरणं कीदृश परमेश्वरः अधिष्ठानस्थितोऽपि समाधिस्थितोऽपि यद्वा वाह्यस्थितोऽपि प्रभुः स्वामी पुनः कीदृशं चक्रं मन्मथशत्रुणामहादेवेन अवनेअवनकृतसर्वलोकरक्षार्थं दत्तं पुनः दूरीकृतातिवृष्ट्यनावृष्ट्याद्युपद्रवं पुनः दीप्तनवेन इवशोभनं देदीप्यमानं किंभूतं कृष्णं पापरहितं स्वीकृतमायं पुनर्ध्रुवमविनाशिनं पुनर्वधकृतामुपद्रवकारिणांकायविमर्दनं शरीरनाशकं पुनः भुञ्जद्युकं भुञ्जत्स्वर्गलोकं पुनर्जात्यायादवमित्यर्थः अत्र पद्ये चक्रबन्धे ग्रन्थकर्तास्वनाम प्रक्षिप्तवानिति बोध्यम् ॥ ११६ ॥

इति श्रीगोविन्दविद्याविनोदभट्टाचार्यविरचिते क्रमदीपिकाविवरणेऽष्टमः पटलः समाप्तः ॥ ८ ॥

THE

CHOWKHAMBÁ SANSKṚIṬ SERIES.

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NOS. 233, 236 & 254.

क्रमदीपिका ।

श्रीमन्महामहोपाध्यायकाश्मीरिक
केशवभट्टविरचिता ।

विद्याविनोदश्रीगोविन्दभट्टाचार्य कृतविवरणोपेता । तथा-

लघुस्तवराजस्तोत्रम् ।

श्रीमद्वैष्णवाचार्यश्रीश्रीनिवासाचार्यविरचितम् ।

श्रीहयग्रीवानुग्रह जीवन स्वभूदेवपदानन्याश्रित वैष्णव पुरुषोत्तमप्रसादप्रणीत
गुरुभक्तिमन्दाकिन्याख्यव्याख्या समलंकृतम ।

श्रीयुतकान्यकुब्जकवीन्द्रवर—दुःखभञ्जनशर्मतनूजनुषा साहित्यसाङ्ख्ययोगाद्यनेकशास्त्रा-
ध्यापकेन—देवीप्रसादशर्म्मकविना संशोधितौ ।

KRAMADIPIKA,

By Mahamahopadhyaya Kasmirika Kesav Bhatta.
WITH A COMMENTARY BY Sri Govind Bhattacharya.
and LAGHUSTAVARAJASTOTRAM
By Sri Niwasacharya.
With a commentary "Gurubhakti Mandakini"
By Purushottam Prasada.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE. BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press.
BENARES
1917
Price Rupees three.

अथ मुद्रालक्षणानि ॥

अङ्गुलीः करयुग्मस्य संप्रसार्य प्रबन्धयेत् ।
मध्यपृष्ठगतानामे तर्जनीभ्यां निरोधयेत् ॥ १ ॥
मध्यमाग्रे समं कृत्वा कनिष्ठामध्यमोपरि ।
तयोरुपरि चाङ्गुष्ठौ मुद्रायोनिस्तु खेचरी ॥ २ ॥
तर्जनीशेषमाकुञ्च्यशेषाणां च निपीडयेत् ।
अङ्कुशं दर्शयेन्मन्त्री गृहीत्वा दक्षमुष्टिना ॥ ३ ॥
इत्यङ्कुशमुद्रा ॥
आवाहनं स्थापनं संनिधानं सनिरोधनम् ।
संमुखीकरणं सकली करणं चावगुण्ठनम् ॥ ४ ॥
धेनुपीयूषकरणं महामुद्रा तथैव च ।
परमीकरणं चैव नवमुद्राः प्रकीर्त्तिताः ॥ ५ ॥
एतेषां लक्षणमाह—
सम्यक् संपूरितः पुष्पैः कराभ्यां कल्पिताञ्जलिः ।
आवाहनी समाख्याताकराभ्यां देशिकोत्तमैः ॥ ६ ॥
अधोमुखी कृता सैव स्थापनीति निगद्यते ।
आश्लिष्टमुष्टियुगला प्रोन्नताङ्गुष्ठयुग्मिका ॥ ७ ॥
सन्निधाने समुद्दिष्टा मुद्रेयं तन्त्रवेदिभिः ।
अङ्गुष्ठगर्भिणी सैव सन्निरोधसमीरिता ॥ ८ ॥
मुष्टिद्वयस्थिताङ्गुष्ठौ सन्मुखौ च परस्परम् ।
संश्लिष्टावुच्छ्रितौ कृत्वा सेयं सन्मुखमुद्रिका ॥ ९ ॥
देवाङ्गेषु षडङ्गानां न्यासः स्यात्सकलीकृतिः ।
हृदयादिशरीरान्ते कनिष्ठाद्यङ्गुलीषु च ॥ १० ॥
हृदादिमन्त्रविन्यासः सकलीकरणं मतम् ।
सव्यहस्तकृतामुष्टिदीर्घाधोमुखतर्जनी ॥ ११ ॥
अवगुण्ठनमुद्रेयमभितोभ्रामिता भवेत् ।
अन्योन्यतर्जनीयुग्मं भ्रमणादवगुण्ठनम् ॥ १२ ॥
अन्योन्याभिमुखाश्लिष्टाकनिष्ठानामिका पुनः ।
तथा तु तर्जनीमध्या धेनुमुद्राप्रकीर्त्तिता ॥ १३ ॥

अमृतीकरणं कुर्यात् तया देशिकसत्तमः ।
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितकराङ्गुलिः ॥ १४ ॥
महामुद्रेयमुदितापरमीकरणं बुधैः ।
शङ्खं चक्रं गदां पद्मं मुसलं शार्ङ्गखड्गकौ ॥ १५ ॥
पाशाङ्कुशौ वैनतेयं श्रीवत्सं कौस्तुभं तथा ।
वेणुं चैवाऽभयवरौ वनमालां प्रदर्शयेत् ॥ १६ ॥
एतेषां लक्षणमाह—
वामाङ्गुष्ठं विधृत्यैव मुष्टिना दक्षिणेन तु ।
तन्मुष्टेः पृष्ठदेशे तु योजयेच्चतुरङ्गुलीः ॥ १७ ॥
दक्षिणेचोन्मुखेऽङ्गुष्ठे तेषामग्राणि योजयेत् ।
कथिता शङ्खमुद्रेयं वैष्णवार्चनकर्मणि ॥ १८ ॥
अन्योन्याभिमुखाङ्गुष्ठकनिष्ठायुगलं यदा ।
विस्तृतीश्चेतराङ्गुल्यस्तदासौ दर्शिनी मता ॥ १९ ॥
अन्योन्यग्रथिताङ्गुल्यउन्नता मध्यमौ नतौ ।
संलग्नौ चेत् तदा मुद्रा गदेयं संप्रकीर्त्तिता ॥ २० ॥
अन्योन्याभिमुखौ पाणी पद्माकारौ च मध्यतः ।
कर्णिकावनताङ्गुष्ठौ पद्ममुद्रा प्रकीर्त्तिता ॥ २१ ॥
मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणम् ।
कृत्वा मुसलमुद्रेयं सर्वविघ्नविनाशिनी ॥ २२ ॥
वामस्थतर्जनीप्रान्तं मध्यमान्ते नियोजयेत् ।
प्रसार्य च करं वामं दक्षिणं करमेव च ॥ २३ ॥
नियोज्यदक्षिणस्कन्धे बाणग्रहणवत्ततः ।
तर्जन्यङ्गुष्ठयोर्योगं कुर्यादेषा प्रकीर्त्तिता ॥ २४ ॥
शार्ङ्गमुद्रेयं मुनिभिर्दर्शयेत्कृष्णपूजने ।
कनिष्ठानामिके द्वे तु दक्षाङ्गुष्ठनिपीडिते ॥ २५ ॥
शेषं प्रसारितं कृत्वा खड्गमुद्रां प्रदर्शयेत् ।
पाशाकारं नियोज्यैवं वामाङ्गुष्ठस्य तर्जनिम् ॥ २६ ॥
दक्षिणं मुष्टिमास्थाय तर्जनीं च प्रसारयेत् ।
तेनैवं संस्पृशेन्मन्त्री वामाङ्गुष्ठस्य मूलकम् ॥ २७ ॥
पाशमुद्रेयमुद्दिष्टा केशवार्चनकर्मणि ।
तर्जनीमीषदाकुञ्च्यशेषाणां च निपीडयेत् ॥ २८ ॥

अङ्कुशं दर्शयेत् तद्वद्गृहीत्वा दक्षमुष्टिना ।
अन्योन्यपृष्ठे संयोज्य कनिष्ठं च परस्परम् ॥ २९ ॥
तर्जन्यग्रं समं कृत्वाऽङ्गुष्ठाग्रं च तथैव च ।
ईषदालम्बनं कृत्वा मध्यमेन च पक्षवत् ॥ ३० ॥
प्रसार्य गारुडी मुद्रा कृष्णपूजा विधौ स्मृता ।
अन्योन्यं संमुखे तत्र कनिष्ठातर्जनीयुगे ॥ ३१ ॥
मध्यमानामिके तद्वदङ्गुष्ठेन निपीडितम् ।
दर्शयेद्दक्षः स्थले मुद्रांयत्नात् श्रीवत्ससंज्ञकाम् ॥ ३२ ॥
अन्योन्याभिमुखे तद्वत्कनिष्ठेसंनियोजयेत् ।
तर्जन्यनामिके तद्वत्करौत्वन्योन्यपृष्ठगौ ॥ ३३ ॥
उच्छ्रितान्योन्यसंलग्नादक्षहस्तकराङ्गुलीम् ।
निधायमध्यदेशे तु वाममध्यमतर्जनीम् ॥ ३४ ॥
संयोज्यमणिवन्धे तु दक्षिणे योजयेत्ततः ।
वामाङ्गुष्ठे तु मुद्रेयं प्रसिद्धा कौस्तुभा मता ॥ ३५ ॥
अधोमुखे वामहस्ते ऊर्द्धास्यं दक्षहस्तकम् ।
क्षिप्त्वाङ्गुलीरङ्गुलिभिः संयोज्य परिवर्तयेत् ॥ ३६ ॥
एषा संहारमुद्रा स्याद्विसर्जनाविधौ मता ।
अङ्गं प्रसारितं कृत्वा स्पृष्टशाखं वरानने ॥ ३७ ॥
प्राङ्मुखं तु करं कृत्वा अभयं परिकीर्त्तितम् ।
दक्षं भुजं संप्रसार्यजानूपरि निवेशयेत् ॥ ३८ ॥
प्रसृतं दर्शयेद्देवि वरः सर्वार्थसाधिनी ।
स्पृशेत्कण्ठादिपादान्तं तर्जन्यङ्गुष्ठमूलयोः ॥ ३९ ॥
करद्वयेन मालावन्मुद्रेयं वनमालिका ॥ ४० ॥
छोटिकालक्षणमाह—
द्वौकरौ पृष्टसंलग्नौ भ्रामयेच्चतुरङ्गुलीः
छोटिका सुसमाख्याता प्रणामे तां प्रदर्शयेत् ॥ ४१ ॥

इति शम् ।

सब प्रकार की संस्कृत पुस्तकों के मिलने का पता—

हरिदासगुप्तः

चौखम्बा संस्कृत सीरीज आफीस

बनारस सिटी ।

सूचीपत्रम् ।

क्रमदीपिका—

निखिलमहीचक्रवालाचार्यचक्रचूडामणिश्रीभगवन्निम्बार्कमहामुनीन्द्रपादपीठाधिकृतजगद्विजयिश्रीकेशवभट्टाचार्यप्रणीता ।

विद्याविनोदश्रीगोविन्दभट्टकृतविवरणोपेता ।

तन्त्रग्रन्थोऽयम् ।

अस्मिन् अष्ट पटलाः सन्ति ।

शक्तिवर्णा
संमोहनगायत्री,
तत्प्रभावः,
मन्त्रद्वयसाधारणतर्पणम्,
मन्त्रद्वयसम्बन्धिप्रयोगान्तरम्,
रुक्मिणीवल्लभमन्त्रोद्धारः,
मन्त्रवर्णसंख्या,
मन्त्रस्यऋष्यादिकम्,-
अङ्गविधिश्च,
न्यासोध्यानं च,
होमः सेवाच,
तत्फलम्,
मन्त्रान्तरेभ्योऽस्याऽतिशयः,
प्रयोगप्रकारस्तत्फलं च,
उपसंहारः,
इत्यादयोऽन्ये च विषयाःअत्र निरूपिताः सन्ति,

॥ श्रीः ॥

अथ ।

लघुस्तवराजस्तोत्रम् ।

श्रीवैष्णवाचार्य श्रीश्रीनिवासाचार्यविरचितम्-
श्रीहयग्रीवानुग्रहजीवितस्वभूदेवपदानन्याश्रित पुरुषोत्तमप्रसाद
वैष्णवविरचित गुरुभक्तिमन्दाकिन्याख्यव्याख्योपेतम् ।

श्रीकृष्णायनमः ।
श्रीगुरुचरणेभ्योनमः ।

वन्दे श्रीश्रीनिवासार्य्यं वेदान्ताम्बुजभास्करम ॥
प्रपन्नजनसन्त्राणलब्धदीक्षंजगद्गुरुम् ॥ १ ॥

इहखलु सकललोकस्य हितञ्चिकीर्षुर्भगवान्पाञ्चजन्यावतारो निरतिशयवात्सल्यकारुण्यादिगुणो निजाश्रितसंरक्षणलब्धदीक्षः श्रीश्रीनिवासाचार्याभिधो ब्रह्मरुद्रेन्द्रादिकिरीटेडितपादपीठवेदान्तकवैद्यपरब्रह्मादिशब्दाभिधेयश्रीपुरुषोत्तमाज्ञयाऽवनितलावतीर्णं जगदुद्दिधीर्षुं तदाचिन्त्यानन्तशक्त्युपबृंहितानन्तशक्तिं श्रीसुदर्शनावतारं नियमानन्दसमाख्यं ह्याद्याचार्यं निजगुरुं मिताक्षरेण स्तोत्रेण तुष्टाव, तस्य व्याख्यानं यथामति पदार्थमात्रेण निभाल्यते तत्प्रसादैकप्रयोजनेन,

जयजयेति-

जयजयेङ्गितज्ञाता नियमानन्द आत्मवान् ।
नियमेन वशे कुर्वन्भगवन्मार्गदर्शकः ॥ १ ॥

हेनियमानन्द त्वं जयजय स्वोत्कर्षमाविष्कुरु, आदरेवीप्सा, तत्र

शास्त्राचार्यसंस्कारशून्यान्कुतर्कनिष्ठान्नियमयति औपनिषदमार्गैस्था-पयतीतिनियमः स्वाश्रितानानन्दयतीत्यानन्दः नियमश्चासावानन्द-श्चेतिनियमानन्दः यद्वा नियमेनदेशकालादिपरिच्छेदशून्येनानन्दो-यस्यसः सदासर्वत्रपरिपूर्णानन्दइत्यर्थः यद्वा चेतनाचेतनवस्तुजातं नियमयति स्वेस्वेकार्ये यथाधिकारं स्थापयतीतिनियमोविश्वान्तर्या-मीभगवाञ्छ्रीवासुदेवस्तस्मिन्नानन्दोयस्यसः श्रीपुरुषोत्तमस्वरूप-गुणादिविषयकानवच्छिन्ननिरतिशयानन्दाश्रयइत्यर्थः यद्वा निः-शेषेणयमोनियमः निःशेषेणबुद्ध्यादीनामुपरमः समाधिः तेना-नन्दोयस्यसः सदासमाध्यानन्दपूर्णइत्यर्थः यद्वा निःशेषेणयमय-ति स्वाज्ञायां प्रवर्त्तयति जीवानितिनियमोवेदस्तस्यापिवेद-स्यानन्दोयस्मात्तथोक्तोनियमानन्दः वेदस्ययथार्थव्याख्यानंतत्प्रव-र्त्तनञ्चैवानन्दहेतुः तदर्थमेवास्यावतारत्वादित्यलं विस्तरेण तस्य संबोधनमेतत्, ।

तमेवविशिनष्टि ।

इङ्गितज्ञातेति ।

श्रीभगवत इङ्गितम् इदानीमेव तदाज्ञाकरणीयतया प्रवर्त्ततइति जानातीतिसः यद्वा जीवानामिङ्गितम् अनेनोपायेनाऽसौ कृतार्थः स्यात् असौ सकामः असौ निष्कामः असौ मायया मां भजति असौ श्रद्धाविश्वासार्जवादिना भजतीत्यादि तत्तच्चेष्टितं जानातीति तथा चेष्टितस्य ज्ञातेति वा विग्रहः सर्वज्ञत्वात् ।

सर्वज्ञत्वेहेतुमाह—

आत्मवानिति ।

आत्माशब्दोऽत्र ब्रह्मवाचकः "तस्माद्वाएतस्मादात्मन आका-शः सम्भूत" इत्यादिश्रुतेः स प्रत्यक्षेणविद्यतेयस्यसः ब्रह्मज्ञएवस-र्वज्ञः "आत्मन्परेदृष्ट" इत्यादिश्रुतेः यद्वा आत्मानो जीवात्मानोऽन-वच्छिन्नानुभूतिविषयतया विद्यन्ते यस्य स तथोक्तः तच्चेष्टितज्ञा-नाभावेबोधकत्वासम्भवात् अतएव भगवन्मार्गदर्शकइति द्र-ष्टुरेवदर्शकत्वनियमात् असौसद्योमोक्षाधिकारी असौचि-रकालेन साधनसंपत्त्या मोक्षभागी भविष्यति असौ भगवद्भागवत-द्वेष्टा नित्यसंसारी औपनिषदैरुपेक्षणीय इति ज्ञात्वैव तदनुसारेण तत्तत्साधनेषु स्थापयित्वा भगवदीयमार्गं दर्शयतीति तथा

"येनाक्षरम्परमं वेदसत्यं प्रोवाचतांतत्वतो ब्रह्मविद्या"मिति श्रुतेः किं कुर्वन् नियमेनवशोकुर्वन्निति नियमोऽत्रनियमनरूपसामर्थ्यविशेषः तेन तान् क्षेत्रज्ञान् वशोकुर्वन्वा ऽनुग्रहविषयीकुर्वन् यद्वा नियमेन शरीरवाङ्मनोव्यापाराणां देशकालादिपरिच्छेदशून्यतया भगवदाज्ञापालनात्मके परभक्तियोगे नियमनं नियमस्तेन श्रीहरिंवशेकुर्वन्नित्यर्थः भगवन्तं वशीकृत्वा तद्द्वारेण तेषां बुद्धिं प्रेरयित्वा भगवन्मार्गदर्शकस्तदुपदेष्टा भवतीति तात्पर्यार्थः अन्तःप्रेरणया विना तदन्तर्निष्ठाभावेनोपदेशमात्रस्य कार्यकारित्वायोगात् भगवन्मार्गोऽत्र साधनोपदेशक्रमस्तस्य दर्शकः यथाऽधिकारमुपदेष्टेतियावत् भगवन्मार्गोऽर्चिरादिमार्गो वा सचाऽध्यात्मसुधातरङ्गिण्यां विस्तृतः यद्वा मृग्यते शास्त्रविचारेण योगादिसाधनैश्च कृत्वा मुमुक्षुभिरिति मार्गस्तत्स्वरूपगुणरूपादिः "सोऽन्वेष्टव्य"इति श्रुतेः यद्वा नियमेनेति निग्रहानुग्रहरूपनियमनशक्तियोगेन सर्वानपि जीवात्मनो वशे कुर्वन् भगवन्मार्गे प्रवणीकारः तत्र स्वाश्रिताननुग्रहेण वहिर्मुखांश्च निग्रहेण ।

तथा च वक्ष्यते ॥

निग्रहानुग्रहाभ्यां वै श्रीकृष्णे समानतेति ।

भगवत्स्वरूपगुणादिविषयकसाक्षात्कारानुभूतिकारितेतियावत् तत्र स्वरूपं सर्वव्यापकःसर्वात्मा सर्वाधारो जगद्योनिः शास्त्रैकवेद्यो देशकालादिपरिच्छेदशून्यः सच्चिदानन्दोऽनन्त इति "सर्वव्यापी सर्वभूतान्तरात्मा यस्मिल्लोकाः श्रिताः सर्वे" "यतो वा इमानि भूतानि जायन्ते" "सर्वे वेदा यत्पदमामनन्ति" "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्मे"त्यादि श्रुतिभ्यः, गुणाश्च ज्ञानशक्तिवलैश्वर्यादयो वात्सल्यकारुण्यक्षमादयश्च स्वाभाविकाः कल्याणरूपा यावदात्मवृत्तिसंख्यादिपरिच्छेदशून्याः "परास्यशक्तिर्विविधैवश्रूयते स्वाभाविकीज्ञानवलक्रियाच"- "यः सर्वज्ञः सर्ववित्" ।

समस्तकल्याणगुणात्मकोऽसौ तेजोवलैश्वर्यमहाववोधः ।
स्ववीर्यशक्त्यादिगुणैकराशिः ।
इत्यादिश्रुतिस्मृतिभ्यश्च ॥

आदिनासर्वमङ्गलविग्रहः "यदापश्यः पश्यतेरुक्मवर्णंयदात्मको-

भगवान् तदात्मिकाऽव्यक्तिः" "हिरण्यकेशः हिरण्यश्मश्रुराप्रण-खात्सुवर्ण" इत्यादि श्रुतिभ्यः ।

तद्विस्तारश्च श्रुत्यन्तकल्पवल्ल्यां द्रष्टव्यः ।

अथ

यस्यदेवेपराभक्तिर्यथादेवे तथा गुरौ ।
तस्यैतेकथिताह्यर्थाः प्रकाशन्तेमहात्मनः ।

इत्यादिश्रुतिबोधितभगवद्भावप्रतिपादकोऽप्ययं श्लोको व्याख्यायते हे नियमानन्द इति ।

चेतनाचेतनात्मकं जगन्नियमयतीति नियमोविश्वान्तरात्मा भगवाञ्छ्रीपुरुषोत्तमः–"आत्मानमन्तरोयमयत्येषते आत्मान्तर्यामी" तिश्रुतेः, आनन्दयत्यानन्द आनन्दस्वरूपोवेति "एष आनन्दयति" "विज्ञानमानन्दं ब्रह्म"त्यादिश्रुतेः, नियमश्चासावनन्दश्चेतितथोक्तः सर्वान्तरात्मानन्दरूपो भगवान्वासुदेव इत्यर्थः तस्य सम्बोधनमिदम् अत एव इङ्गितज्ञातेति, सर्वान्तरात्मत्वादेव सर्वस्येङ्गितस्य वाह्याभ्यन्तरचेष्टितस्य ज्ञाता तस्यार्जवकौटिल्यादिचेष्टितं तत्तदनुकूलप्रापणं तत्तद्भोगफलं च सर्वं साक्षात्पश्यतीति यावत्, एतेन श्रीभगवतो विश्वान्तरात्मत्वं तत्समानाधिकरणं स्वातन्त्र्यं सार्वज्ञं च प्रतिपादितं, तेनैव च व्यतिरेकमुखेन जीवात्मनां तदात्मीयत्वं तत्परतन्त्रत्वमल्पज्ञत्वं चापि फलितम् ।

अथ सिद्धान्तमपि समासतो दर्शयन् विशिनष्टि ।

आत्मवानिति ।

आत्मानस्त्रिविधा अपि नित्यमुक्तवद्धविशेषयुक्ताः क्षेत्रज्ञास्तदाधेयतत्तन्त्रतद्व्याप्यतदात्मकत्वादिभ्यस्तदात्मीया विद्यन्ते यस्य स आत्मवानिति विग्रहःतदाधेयत्वादिभिः स्वरूपेण भिन्नत्वमपि जगतस्तदात्मकत्वादिना तदपृथक्सिद्धत्वादभिन्नत्वं भिन्नाभिन्नत्वमित्यर्थः किञ्च प्रकृतिप्रत्यययोः प्रत्ययार्थस्यैव प्राधान्यात् प्रकृत्यर्थानां क्षेत्रज्ञानां परतन्त्रसत्तायोगः "यदासीत्तदधीनमासी"दित्यादि श्रुतेः, प्रत्ययार्थस्य च श्रीमाधवस्य भगवतः कृष्णस्य स्वतन्त्रसत्तायोगो मुख्यवृत्त्यैवसिद्धः "आत्माहिपरमः स्वतन्त्रोऽधिगुणः" "एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत इत्यादिश्रुतेः।

प्रत्यग्ब्रह्मणोः संवन्धसिद्धान्तं निरूप्य तत्प्राप्तिसाधनमपि स्व-

यमेवेत्याह—

भगवन्मार्गदेशक इति ।

भगवतः स्वस्य वेदमुखोक्तस्वप्राप्तिमार्गं वैदिकसम्प्रदायनिष्ठसदाचारनिष्ठसदाचार्याभिगमनादिप्रभृतिस्वप्राप्तिपर्यन्तसाधनक्रमतदनुष्ठानादिरूपं मार्गं दर्शयतीति तथोक्तः वात्सल्यकारुण्यदयातितिक्षादिस्वाभाविकानन्तकल्याणगुणवरुणालयत्वात् स्वयमेव जन्मसमये कृपार्द्रकटाक्षेणावलोक्य सात्विकश्रद्धाविशिष्टं कृत्वा वेदान्तसम्प्रदायाचार्येणाऽऽत्माऽपरमूर्त्तिना वहिर्यामिणा ऽभिसङ्गम्य तदुक्तसाधनसंतति*माचारयित्वा स्वात्मानं प्रापयतीति भावेनाह ।

नियमेनवशेकुर्वन्निति ।

तत्तत्साधनाचरणाद्यनुकूलानुग्रहगर्भितान्तःप्रेरणात्मकेन स्वासाधरणधर्मेणवशेकुर्वन् स्वानुकूलत्वं स्थापयन्नित्यर्थः "यमेवैषवृणुते तेनलभ्यः तमक्रतुं पश्यतिवीतशोकोधातुः प्रसादान्माहिमानमात्मन" इत्यादिश्रुतेः, यद्वानियमोत्र नियमनं निग्रहणरूपासाधारणैश्वर्ययोग इति "भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चम" इति श्रुतेः, तेन दुराचारान्वेदनिषिद्धार्थनिष्ठान् निग्रहाधिकारणे निग्रहेण वशे कुर्वन्नित्यर्थः तथा च दुष्कृतां निग्रहेण वेदोक्तधर्मप्रवृत्तिविरोधं परिहरन्साधूनां वदोक्तधर्मानुगामिनां चानुगृह्णन् तेभ्यो भगवन्मार्गं पूर्वोक्तं मार्गं वेदोक्तसाधनसन्ततिं भगवद्गीताद्युपदेशरीत्या वाऽर्चिरादिरूपं स्वप्राप्तिमार्गं वा दर्शयतीति वाक्यार्थः एतदर्थमेव भगवतोऽवतारत्वात् ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ॥
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ॥
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।
इति भगवदुक्तेः ॥

एवं भूतैश्वर्याद्याश्रयस्त्वं स्वोत्कर्षमाविष्कुरु इति संबन्धः ॥१॥

एतेन श्लोकेनोत्कर्षप्रादुर्भावार्थं प्रार्थना उक्ता तत्प्रार्थनया तुष्टेन स्वबुद्धौ प्रादुर्भावितमुत्कर्षं ज्ञात्वा तदेव वर्णयति ।

---

* आचारयित्वेति पाठः प्रामादिकः ।

स्वरूपगुणकर्मादिभिरुत्तमत्वमेवोत्कर्षस्तस्यैववर्णनार्थमुपक्रमते।

पाखण्डद्रुमषण्डानां दाहकः पावकोपमः॥
गर्वपर्वतदम्भोलिः काम्यकर्माहिपक्षिराट्॥ २॥

पाखण्डाएवद्रुमास्तेषां षण्डाः समूहास्तेषां दाहक इति, वृक्षाणां छेदेपि अङ्कुरादिना पुनरपि रोहदर्शनात्तथा दण्डादिभिया पाखण्डत्यागेपि वासनया दुस्त्यजत्वात् तद्दुर्निवृत्तत्वात् द्रुमत्वोक्तिः, दवाग्निना वनदाहेपि कचित्कचित्तत्तन्मूलावशेषदर्शनात्पुनस्तद्रोहदर्शनाच्च तथापि पाषण्डानां दाहे तन्मूलावशेषात्कदाचिद् भूयः प्ररोहो भविष्यतीत्याह, पावकोत्तम इति, सांवर्त्तकाग्नितुल्यः समूलवस्तुदाहकत्वान्न भूयः प्रादुर्भावसम्भावनेत्यर्थः।

किंच,

गर्वपर्वतदम्भोलिरिति।

गर्वा एव दुरुच्छेद्यत्वात्पर्वतास्तेषांछेदने दम्भोलिर्वज्रः वज्रतुल्यइत्यर्थः स्वाश्रितानां गर्वस्यात्मप्राप्तौ मुख्यप्रतिबन्धकस्य स्वानुग्रहेण सद्योनाशकइत्यर्थः यद्वा शास्त्रमार्गवहिर्मुखानां गर्वपर्वतान् निजैश्वर्ययोगात् तन्निग्रहेण सद्योनाशयतीति तात्कालिकनाशकत्वद्योतनाय दम्भोलिशब्दप्रयोगः।

किञ्च,

काम्यकर्माहिपक्षिराडिति।

"स्वर्गकामो यजेत" "पशुकामोयजेत" इत्यादिकाम्यस्वर्गादिविषयोद्देशेनतत्साधनतया विधीयमानानि काम्यकर्माणि तदनादिवासनाश्चाऽहिस्थानानि यथाहि दष्टस्य परमजाड्यापत्त्या ज्ञानसामान्याभावः तद्दंशनस्यैव तेषामपि श्रेयोज्ञानाभावासाधारणहेतुत्वात् तन्नाशे पक्षिराडिव, यथा पक्षिराड्वैनतेयस्य नामात्मकमन्त्रोच्चारणादहयो भुजगाः पलायन्ते तद्दंशजन्यविषमपि सद्योनश्यति किं पुनस्तत्साक्षात्कारेण, एवं तस्य सामान्यदृष्ट्यापि काम्यकर्मणां सवासनानां निवृत्तिः किं पुनस्तद्विशेषसंबन्धजन्यतदनुग्रहया दृष्ट्या तन्निवृत्तिरिति कैमुत्यन्यायदर्शनार्थमिदमुपमानमित्यर्थः, अत्र काम्यपदप्रयोगेन नित्यनैमित्तिकयोः परम्परया मोक्षोपयोगित्वात्कर्त्तव्यतासूचिता, अस्य वि-

शेषनिर्णयश्च वेदान्तरत्नमञ्जूषायां श्रीपुरुषोत्तमाचार्यपादैर्विस्तृतः अत्रोपरम्यते ॥ २ ॥

किञ्च मत्तवादगजेन्द्राणां पञ्चाननमहोज्वल इति ।

मत्तवादगजेन्द्राणां पञ्चाननमहोज्ज्वलः ॥
कामादिविषयाब्धीनां शोषकः कुम्भसम्भवः ॥ ३ ॥

अनेककुतर्ककुशलानां स्वकपोलकल्पिता वादा एव गजेन्द्राः मत्ताश्चते वादगजेन्द्राश्चेति विग्रहः, मत्तवादीतिपाठे वादिनो देहेन्द्रियमनोबुद्धिप्राणाद्यात्मवादिनः भूतसङ्घातकारणवादिनो नास्तिकाः, कर्मकालपरमाणुप्रकृत्यादिकारणवादिनो मीमांसकतार्किकादयश्च, अध्यासवादिनो मायावादिनश्च, तएव गजेन्द्राः मत्ताश्चतेवादिगजेन्द्राश्चेति पूर्ववद्विग्रहः उत्कृष्टंमन्यानाम् उत्कृष्टताख्यापने गजेन्द्रोपमानं तेषां पराभवे पञ्चाननमहोज्ज्वलः साक्षाच्छ्रीनृसिंहोपमः, यथा सामान्यनृसिंहस्य नाममात्रमपि श्रुत्वा गजेन्द्रा दूरतः पलायन्ते किं पुनः श्रीनृसिंहस्य, तथा तस्यवाग्विलासमात्रश्रवणेनैव सर्वे वादिन आत्माभिभवं निश्चिन्वाना दिशो द्रवन्तीति तात्पर्यार्थः ।

किञ्च,

कामादिविषयाब्धीनां शोषकः कुम्भसम्भव इति ।

आदिशब्दः क्रोधलोभमोहमदमात्सर्यविषादशोकादिसङ्ग्रहार्थः कामादिविषया एवाब्धयः वासनाबाहुल्येनाऽगाधत्वात् दुस्तरत्वाच्चोपमानम्, एकैकस्यापि तथात्वाद्बहुवचनं, तेषां शोषकः, तत्रोपमानं कुम्भसम्भव इति, सद्योऽप्रयासेन शोषणमात्रे एवोपमा, यथा श्रीदाशरथिना रावणोहतः, श्रीभगवता वासुदेवेन रुद्रेन्द्रादयः पराजिता इत्यादिस्तुतिः, संकल्पमात्रेण निमिषार्द्धेप्यनन्तकोटिब्रह्माण्डोत्पादनादि कर्त्तुं समर्थस्य कियदेतत्स्तवनं, तथा प्रकृतेऽपि बोध्यम्, क्षमया पृथिवी सम इत्याद्युपमानवत् ।

वस्तुतस्तु कामादिनिवारणं कुम्भसम्भवस्यापि दुष्करं वद्धकोटित्वात्प्रारब्धपरतन्त्रत्वाच्च, भवतस्तु न किञ्चिदपि दुर्लभं साक्षाद्भगवत्करस्थसुदर्शनावतारत्वात् ॥ ३ ॥

किञ्च ।

भक्त्यौषधिलतानां च पोषकश्चन्द्रशीतल इति ।

भक्त्यौषधिलतानां च पोषकश्चन्द्रशीतलः ॥
संप्रदायप्रबोधाय दीपको ध्वान्तनाशकः ॥ ४ ॥

यथा प्राणिनां यवव्रीह्याद्यौषधयो जीवनहेतवः तथाश्रेयस्कामानां हरिभक्तिरेव जीवनौषधिरिति तात्पर्येणौषधिरूपणं, भक्तिरेवौषधिस्तस्य लतानां पोषकश्चन्द्रवत् शीतलः सदाविर्भूतस्व स्वरूपपरस्वरूपानन्दाश्रयत्वात्, "सदापश्यन्ति सूरय" इति श्रुतेः,

किञ्च,

सम्प्रदायप्रबोधायेति ।

सम्प्रदायविषयकप्रबोधाय ज्ञानाय सम्प्रदायानुगामिभ्यस्तद्विषयकज्ञानप्रकाशनार्थं तन्निरूपितसिद्धान्तविषयकज्ञानप्रतिबन्धकावरणनाशार्थं दीपकः, तत्र हेतुः ध्वान्तनाशकः, दीपकस्य तमोनाशकत्वं स्वभावत एव सिद्धमित्यर्थः, "येनाक्षरं परमं वेद सत्यं प्रोवाचतां तत्वतो ब्रह्मविद्याम्" ।

सुदर्शनमहाबाहो सूर्यकोटिसमप्रभ ।
अज्ञानतिमिरान्धानां विष्णोर्मार्गं प्रदर्शय ।
इत्यादिश्रुतिस्मृतिभ्यः ॥ ४ ॥

किञ्च ।

संसारकूपमग्नानांकरावलम्बनदायक इति ।

संसारकूपमग्नानां करालम्बनदायकः ॥
सुशीतलमना नित्यं माधुर्येण विराजते ॥ ५ ॥

संसारएव कूपवदुद्धरणाशक्यत्वात्कूपस्तत्र मग्नानां जीवानां करावलम्बोभागवतधर्मं उद्धरणहेतुत्वात्तस्य दायकः तदुपदेष्टृत्वात्-

तथाचशान्तिपर्वणिभीष्मः ।
गजेन कश्चित्पुरुषः कानने समभिद्रुतः ।
जिघांसाभयसंत्रस्तः प्रविवेश महद्वनम् ।
अथ पश्यति तत्रस्थं सिंहयूथमवस्थितम् ।
तं दृष्ट्वा स निवर्त्तेत दिशमन्यामधावत ।
तत्राऽपश्यत् खड्गहस्तां भीमकन्याञ्च दारुणाम् ।

आधावन्तीमभिमुखं तिष्ठतिष्ठेति चाऽब्रवीत् ।
तां दृष्ट्वा स निवर्त्तित्वा दिशमन्यामधावत ।
तस्यामपश्यत्तत्रस्थं प्रदीप्तवनमग्निना ।
स तत्र चिन्तयामास अहोकष्टमवस्थितम् ।
इतो गज इतः सिंह इतः कन्यान्वितो दवः ।
निराशां जीविते प्राप्तस्तत्र कूपमपश्यत ।
कक्षायतनमत्यन्तमन्धकारमनन्तकम् ।
स तत्र कूपे पुरुषः पपात भयपीडितः ।
अथाऽलोकयत त्रस्तः सर्पं कूपतले स्थितम् ।
विजृम्भमाणं घोरास्यं श्वसन्तं लेलिहाननम् ।
वल्लीमादाय राजेन्द्र तलेऽतिष्ठदधोमुखः ।
अलाबूरिव तत्रासौ तस्यां वल्ल्यां प्रलम्बितः ।
तस्या वल्ल्यास्तु मूलानि व्यच्छिनत्तत्र मूषकः ।
उपद्रवास्तु तत्रान्ये दंशका मत्कुणादयः ।
तत्राप्यन्यद्रसोत्पन्नं क्षौद्रं मधुकराक्षतम् ।
तप्तं तच्चाल्यमानं तु घृष्यमाणमभिद्रुतम् ।
अपिबन्मधु तत्रस्थः पतितं तस्य मूर्द्धनि ।
पतितं मस्तके तस्य मधु तन्मुखमाविशत् ।
पतितं मस्तके सर्वमपिबत् स पिपासितः ।
यथा स पुरुषो वत्स घोरे वर्त्तति सङ्कटे ।
तथा शरीरिणः सर्वे घोरे वर्त्तन्ति संशये ।
अस्य विवरणम् ।
योऽसौ गजो महावीचिर्विद्धि देहि हिताहितम् ।
सिंहान् रोगान्विजानीहि विहाराहारसम्भवान् ।
असिहस्ता तु या कन्या सा जरा दुरतिक्रमा ।
यो दवाग्निः स शोको वै लोभमोहभयाश्रयः ।
कूपस्तु मानुषो लोकः कालो जगदुपद्रवः ।
आयुर्वल्ली तथा प्रोक्तं मूषको मृत्युरुच्यते ।
योऽसौ कूपतले सर्पः समयः काल उच्यते ।
कामं मधुरसं विद्धि संशयो नाऽत्र विद्यते ।
मधुनश्चापि यत्स्वाद्यं कामस्वादो हि स स्मृतः ।

एवं श्रुतगुणो वत्स धर्मोत्कृष्टमतिर्भव ।
संशयेनाऽजितात्मा त्वं मोक्षं यासि यथाक्रमम् ।
एवं संसारकूपस्य धर्म एव परा गतिरिति ।

एवं भूते संसारकूपे मग्नानां करावलम्बं भागवतधर्मं द- त्वा तदुद्धारको भवानिति वाक्यार्थः ।

किञ्च सुशीतलमना इति ।

सुष्ठु शीतलं कामादिजन्यतापास्पृष्टमाहात्म्यकं मनो यस्य सः नित्यमुक्तत्वात् तत्कारणकर्मप्रयुक्तप्रकृतिसंबन्धाभावात् ।

अत एव माधुर्येण गुणेन मधुरालापादिना नित्यम् एकरसं य- थास्यात् तथा विराजते विशेषेण प्रकाशते ॥ ५ ॥

किञ्च सुखदातेति ।

सुखदाता भवच्छेत्ता तापत्रयविनाशकः ॥
श्रीकृष्णपूजनानन्दी सर्वदा शुद्धवेषवान् ॥ ६ ॥

सुखस्य परमानन्दभगवद्भावापत्तिलक्षणमोक्षाख्यस्य, तत्र द्वारमाह- भवच्छेत्तेति

भवस्य प्रकृतिसंबन्धनिरूपितजन्ममरणादिचक्रभ्रमणरूपस्य छेत्ता ध्वंसक इति,

अत एवतापत्रयविनाशकइति,

तापा आध्यात्मिकाधिभौतिकादित्रिविधाः, आद्यंद्विविधं शारीरं मानसञ्चेति, शिरोरोगज्वरातिसारामयाक्षिपीडादिकं शारीरं, काम क्रोध द्वेषलोभमोहशोकासूयावमानेर्ष्यादिजन्यं मानसं, मृगपक्षिम- नुष्यराक्षससर्पादिजातमाधिभौतिकं, शीतोष्णवातवर्षाजलविद्युदा- दिसमुद्भवम् आधिदैविकमिति विवेकः,

किञ्च श्रीकृष्णपूजनानन्दीति,

श्रीकृष्णस्य पूजनेनानन्दोयस्यास्तीति, तथा पूजाचात्र सर्वदे- शकालाद्युचिततत्तत्सङ्कल्पानुकूलाचार इति परमभक्तिरिति यावत्।

किञ्च सर्वदाशुद्धवेषवानिति ।

सर्वस्मिन्कालेपरमधामावस्थानेवाऽवतारावस्थायां वा शुद्धो- ऽप्राकृतोवेषोयस्यसः नित्यमुक्तत्वेनप्रकृतिसम्बन्धशून्यत्वात् ॥ ६ ॥

अथ प्रेमभक्तिमत्वं दर्शयन्नाह—
आनन्दाश्रुकलापूर्ण इति ।

आनन्दाश्रुकलापूर्णः सानुरागसुधान्वितः ॥
अहंममेति दौर्जन्यनाशको बुद्धिदः स्वयम् ॥ ७ ॥

यतः सानुरागसुधान्वितः अनुरागेणसहिता सानुरागा भगवत्स्वरूपगुणादिविषयकाप्रीतिः सैवसुधा तयाऽन्वितः सम्पन्नः उक्तलक्षणनिरातिशयप्रतीतेरेकाश्रय इत्यर्थः ।
स्वाश्रितसर्वदोषसमूलहारित्वमनुसंदधदाह ।

अहंममेतिदौर्जन्यनाशक इति ।

देहादावहमिति पुत्रवित्तादौममेति दौर्जन्यंदुर्जनानांरिपूणांभावोवैरिभावमिति यावत् आत्मनैवात्मनाशकत्वं, यद्वा अहमिति आत्मनिस्वतन्त्रसत्तावच्छिन्नाहंत्वनिश्चयः, वस्तुतः आत्मनांतदात्मकतयापुरुषोत्तमस्यैवाहंप्रत्ययस्य प्रधानविषयत्वात्, तथैव देहादौममेति "यस्मिन्निन्द्रोवरुणोमित्रोदेवा ओकांसि चक्रिरे" इत्यादिभ्यः, तथाभूतां व्यवसायात्मिकां बुद्धिं स्वयमेवदत्वोक्तसंसरणहेतोर्दौर्जन्यदाम्भिकत्वाद्यात्मरिपोर्विपरीतज्ञानान्मोचयतीति वाक्यार्थः,

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति—
श्रीमुखोक्तेः ।

अत्र बुद्धिप्रदानं वहिर्यामिशास्त्राचार्यमुखेन तदुक्तानुभावनं तद्विपरीतभावनाशनं चाऽन्तर्यामिरूपेणविश्वबुद्धिनियन्त्रेतिविवेकः॥७॥

स्वाश्रितदोषनाशकत्वं निरूप्य तेषां पोषकोऽपि सएवेत्याह—
स्वस्य लावण्यमाधुर्यपोषकश्चाऽनुवर्त्तिनामिति ।

स्वस्य लावण्यमाधुर्यपोषकश्चानुवर्त्तिनाम् ॥
नितरां शाठ्यहर्त्ता च धाता सर्वभयापहः ॥ ८ ॥

अनुवर्त्तिनां स्वाश्रितानन्यभक्तानां तदाज्ञानुवृत्त्येकजीवनानां

स्वस्य लावण्यमाधुर्याभ्यां पोषकोभरणपोषक इति योगक्षेमकर्त्तृतियावत्, अप्राप्तप्रापणंयोगः प्राप्तस्य पालनं क्षेमइति विवेकः अप्राप्तानां श्रेयोऽसाधारणहेतूनां ज्ञानभक्तिविरागादीनां प्रापकत्वात् प्राप्तानां च तेषां तद्विरोधिभ्यः कामक्रोधादिनिरयासाधारणहेतुभ्यस्तद्रिपुभ्योरक्षकत्वात् योगक्षेमकर्त्तृत्वसिद्धिरित्यर्थः।

तत्प्रकारमाह–

स्वस्येति।

नित्याश्रिताभ्यां स्वाभाविकयावदात्मवृत्तिभ्यां सद्गुणाभ्यां लावण्यमाधुर्याभ्यां तत्र लावण्यं वाचः सौन्दर्यं माधुर्यं मधुरभाषया मनोहारित्वमिति विवेकः यद्वा रूपवृत्तिसौन्दर्यमाधुर्याभ्यां मनोनयनाह्लादजनकतयास्वाश्रितानां पोषक इति।

योगक्षेमवाहकत्वमेवाह विशेषणाभ्याम्—

धातेति।

मातृपितृवत् धारणपोषणकर्त्ता सर्वसम्बन्धविषयत्वात् एतेनयोगकर्त्तृत्वमुक्तं धारणसामग्रीप्रापणयोगत्वात्।

सर्वभयापह इति।

मोक्षसामग्रीदैवीसम्पद्धारिणाम् आसुरीसम्पदाख्यरिपूणां दस्युभूतानां कामादीनां सर्वभयमपहन्तीति तथा सः नितराम्पदस्य सर्वैरपिप्रथमान्तपदैरन्वयोबोध्यः, अत एव शाठ्यहर्त्तेति शठस्य भावः शाठ्यं परवञ्चकत्वधौर्त्यादिदोषास्तेषां हर्त्तेत्यनेनक्षेमकरणत्वमुक्तम्।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहमिति।

श्रीमुखोक्तेः ॥ ८ ॥

अथ गुणान्तरदर्शनेनस्तौति—

अमानीति।

अमानी मानदो मन्यो भावको भावधारकः ॥
सर्वसंशयभेत्ता च सर्वागमविशारदः ॥ ९ ॥

मानोऽभिमानः देहादावात्मत्वाभिमानः सविद्यतेऽस्येतिमानीमानी अमानी नित्यं स्वपरविषयकपरोक्षानुभूतिमत्त्वात्

तत्कारणप्रकृतिसम्बन्धशून्यत्वाच्च "सदापश्यन्तिसूरय" इति श्रुतेः ।

अत एवमानद इति, ।

स्वाश्रितानामुक्तलक्षणं मानमभिमानं द्यतिखण्डयतीति तथोक्तः, यद्वामानं प्रमाणं श्रीपुरुषोत्तमस्वरूपगुणादिविषयकप्रमाकरणं वेदान्तलक्षण्यं स्वचरणप्रपन्नेभ्यो ददातीतिसः, यद्वा मीयते हिंस्यतेऽनेनेतिमानम् अनादिपुण्यापुण्यरूपंसंसरणमूलभूतं कर्म द्यतिखण्डयतीतिसः, स्वजनकर्मात्मिकाविद्यानाशकइत्यर्थः,

अत एव मान्यइति,

श्रेयोर्थिभिः साधुभिर्नितरांपूज्यः आश्रयणीय इत्यर्थः,

किञ्च भावक इति,

स्वभक्तान् भावयति ज्ञानवैराग्यादिसम्पत्त्या वर्द्धयतीति भावकः,

किञ्च भावधारक इति,

भावं भगवद्विषयकं प्रेम धारयतीति तथा,

असाधारणमाचार्यलक्षणं निरूपयन्स्तौति,

सर्वसंशयभेत्ताचेति,

सर्वेषां संशयान् सर्वान्संशयान्वा भिनत्तीतिसः, संशयास्तावद्विविधा आत्मपरमात्मसाधनफलादिविषयभेदात्, तथा हि भगवन्कोऽहं देहेन्द्रियमनोबुद्धिप्राणादिष्वेकतमस्तदन्योवेति स्वाश्रितेन पृष्टेउत्तरम् त्वंदेहो न भवासिजडत्वात् उच्छित्तिधर्मत्वात् मृतेचैतन्यादर्शनाच्च देहस्य घटादिवत्, नापीन्द्रियसंघातः करणत्वात् भौतिकत्वात् स्वप्नेलयदर्शनाच्च स्थूलदेहवत् दण्डचक्रादिवद्वा, अत एव नमनोबुद्धिश्च करणत्वाविशेषात् सुषुप्त्यादिष्वननुगतत्वाच्चेन्द्रियादिवत्, प्राणोपिन वायुत्वात् जन्यत्वाच्च व्यजनजन्यवायुवदिति, तस्माद्देहेन्द्रियमनोबुद्ध्यादिजडवर्गविलक्षणो जाग्रदाद्यवस्थातीतस्तत्तदवस्थाप्रकाशको ज्ञाताहमर्थाभिन्नश्चेतनस्वरूपो ब्रह्मात्मकस्तदधीनस्वरूपस्थितिप्रवृत्तिकोऽणुपरिमाणकः प्रतिदेहं भिन्नो बन्धमोक्षार्हः प्रत्यगात्मा त्वमसीतिसङ्क्षेपः, विशेषस्तु वेदान्तरत्नमञ्जूषायां श्रीपुरुषोत्तमाचार्यपादैर्निरूपितः, किञ्च किं वा जगत्कारणं परमाणवोवा कर्मवा कालोवा प्रकृतिर्वा परब्रह्मवेति संशये परमाणवादीनां जडत्वात्स्वतन्त्रत्वेनकार्योत्पादनत्वासम्भवात्, ब्रह्मैवजगत्कारणं सर्वज्ञत्वेसति चेतनत्वात् श्रुति-

प्रमाणकत्वाच्च, "तदैक्षतबहुस्यां प्रजायेय नामरूपेव्याकरवाणि स्वयमात्मानमकुरुत सच्च त्यच्चाऽभवदि"त्यादि श्रुतेः, उक्तलक्षणसङ्कल्पेक्षणादीनामचेतनेष्वसम्भवादित्यर्थः, तत्कारणं सर्वविशेषशून्यं सर्वप्रमाणागोचरं ब्रह्म वा उपहितं वा अध्यासवद्वा सर्वज्ञसर्वाचिन्त्यानन्तस्वाभाविकयावदात्मवृत्तिगुणशक्तिको वेदान्तैकवेद्यः श्रीपुरुषोत्तमोवेति संशये निर्विशेषस्य प्रमाणाभावेनैवासिद्धत्वात् निर्विशेषं वस्तु मिथ्या सर्वप्रमाणाविषयत्वात् शशशृङ्गादिवदित्यनुमानात् उक्तेक्षणादीनां निर्धर्मके वस्तुन्यसम्भवाच्च निर्विशेषंनजगत्कारणं ईक्षणादिधर्मानाश्रयत्वात्प्रकृत्यादिवदित्यनुमानाच्च, नाप्युपहितं निर्धर्मकत्वसाम्यात् धर्मवत्त्वाभ्युपगमेताटस्थ्यहानिप्रसङ्गात्, नापितृतीयं ज्ञानेऽज्ञानाध्यासासम्भवात् इतरेतरात्यन्तविरोधित्वाच्च सूर्येऽन्धतमोऽयोगवत्, तस्माच्चरम एव वेदान्तवेद्योमुक्तोपसृप्योयोगिध्येयो ब्रह्मरुद्रेन्द्रादिसुरर्षिगणेड्यमानोऽचिन्त्यानन्तस्वाभाविकस्वरूपगुणशक्तिकोऽस्पृष्टदोषमहात्म्यो भगवान्वासुदेवः परब्रह्मभूतः श्रीकृष्ण एव जगदभिन्ननिमित्तोपादानकारणमिति, "यः सर्वज्ञः सर्ववित्" "स्वाभाविकीज्ञानबलक्रिया च" "सत्यं ज्ञानमनन्तं ब्रह्म" "यतो वा इमानिभूतानि जायन्ते" "सर्वे वेदायत्पदमामनन्ति" "ब्रह्मविदाप्नोति परं" "यं सर्वे देवानमन्ति" "मुमुक्षुर्वै शरणमहं प्रपद्ये"इत्यादिश्रुतिभ्यः, अथ किं वा मोक्षसाधनं कर्मैव वा कर्मज्ञानसमुच्चयो वा निर्विशेषप्रमाणातीतज्ञानं वा सर्वज्ञसर्वशक्तिपरमेश्वरविषयकं ज्ञानं वेति, नाद्यः कर्मणः कर्मलक्षणाज्ञानविरोधित्वाभावात् "प्लवाह्येते अदृढा यज्ञरूपा" इति श्रुतेः, तस्य परम्परयाज्ञानोत्पादनद्वारा श्रेयःपरत्वाभ्युपगमे इष्टापत्तिः, नापि द्वितीयः उभयोर्विरोधिनोरेकत्र समुच्चयानर्हत्वात् ।

ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेतथे-ति,

श्री *मुखोक्तेः* ।

नापि तृतीयः तस्याज्ञानसाधकत्वाभ्युपगमात्, तस्मादुक्तलक्षणपरब्रह्मस्वरूपादिविषयकमेवज्ञानं मोक्षासाधारणं कारणं "जुष्टंयदापश्यत्यन्यमीशंतन्महिमानमितिवीतशोकः" "तमेवविदित्वातिमृत्युमेतिनान्यः पन्था विद्यतेऽयनाय" "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेती"त्यादिश्रुति

भ्यः, अथ किंवा फलं स्वर्गाद्यभ्युदयरूपं वा मोक्षो वा किंतावत्प्राप्तम् अभ्युदयमेवेति, "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृत"मित्यादिश्रुतिभ्यो अक्षयत्वादिविधानादितिराद्धान्तः, मोक्षएवफलंस्वार्थत्वात् निरतिशयत्वाच्च "नसपुनरावर्त्तते" अनावृत्ति शब्दात् ।

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।

इत्यादिश्रुतिस्मृतिसूत्रेभ्यः ।

नस्वर्गादीनांश्रेयस्त्वं क्षयिष्णुत्वात् "यथेहकर्मजि(चि)तोलोकः क्षीयते एवमेवामुत्रपुण्याजि(चि)तोलोकः क्षीयते" इत्यादिश्रुतेः, आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुनेति—

स्मृतेश्च ।

ननुद्वयोरपिवाक्ययोः श्रौतत्वेनप्रामाण्यसाम्यात् अक्षयबोधकश्रुतेरेव प्राबल्यम् किंनस्यादिति चेन्न, अक्षयत्वबोधकश्रुतेस्तर्कसहकृतत्वात् प्राबल्यम्, स्वर्गादिलोकाः क्षयिष्णवः कर्मजन्यत्वात् कृष्यादिवदितिप्रयोगात्, स्यादेतत् मोक्षएवफलं तथापि किं तस्यस्वरूपं तार्किकाणामेकविंशतिप्रकारदुःखात्यन्ताभावोवा जैमिन्याचार्याभ्युपगतसार्वज्ञादिब्राह्मधर्मापत्तिर्वा औडुलोम्यभिमतचिन्मात्रापत्तिर्वा सर्वाविरुद्धश्रीबादरायणाभ्युपगतभगवद्भावापत्तिर्वेति, नाद्यः अवैदिकत्वात् सुषुप्तावतिव्याप्तेश्च, नद्वितीयः चित्प्राप्तिविधायकवाक्यविरोधात्, नापितृतीयः "सर्वंहपश्यः पश्यती"त्यादिसार्वज्ञविधायकश्रुतिव्याकोपात्, तस्मादुभयश्रुत्यविरुद्धश्चरमपक्षएवश्रेयान् "एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायण" इति निर्णयसूत्रात्, अस्यार्थः एवं चोपन्यासात्पूर्वभावात् पूर्वोक्तब्रह्मभावात सार्वज्ञादिविषयकापरिच्छिन्नानुभवात् ब्रह्मभावापत्तिः अपहतपाप्मत्वादिसंपन्नविज्ञानघनीभूतस्वस्वरूपाविर्भावाच्चाऽविरोधं मोक्षस्वरूपं भगवान्बादरायणो मन्यते इत्यक्षरार्थः, एवं सर्वश्रुतीनां स्वार्थ एव प्रामाण्यात् नैकतमयापि श्रुत्या विरोधः,"निरञ्जनः परमंसाम्यमुपैति""सस्वराड्भवती"त्यादिश्रुत्या सार्वज्ञसाम्याविधानात्, सर्वज्ञसादृश्यस्यापि तत्र सत्वात् सर्वज्ञकल्पत्वमप्यविरुद्धम्, "सर्वंहपश्यः पश्यती"तिश्रुतेः, सादृश्यंनामतद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं, तथा च "मुक्तस्य जगद्व्यापारवर्ज"मितिशास्त्रात् स्वत

न्त्रस्वरूपस्थित्याद्यर्हत्वेन तद्भिन्नत्वे सति सार्वज्ञादीनामपहतपाप्मत्वादीनां च भूयसां ब्रह्मधर्माणां तत्र योगात् परमसाम्यलक्षणसमन्वयः, स्वराड्साम्यात्स्वाराज्ययोगो ऽप्यविरुद्धइतिसंक्षेपः, किंच कोवा शास्त्रविषयः कर्मवा ब्रह्म वा किंतावत्प्राप्तं कर्मैव सर्वज्ञेन भगवता जैमिनिना तत्वविधानात् "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना" मित्यादिसूत्रात्, नन्वेव मपि "सत्यं ज्ञानमनन्तं ब्रह्म" "विज्ञानमानन्दं ब्रह्म" "यः सर्वज्ञः सर्ववि"दित्यादिषु क्रियासंबन्धलेशस्यादर्शनात् कथमिव क्रियापरत्वं, न चातदर्थानामानर्थक्यस्य उक्तत्वात्कथंभूयोविकल्पाकावशइतिवाच्यं, तेषामपिश्रुतित्वाविशेषेणबाधायोगादध्ययनविधिविषयत्वाच्च, अन्यथाऽवैदिकत्वापत्तेर्दुवारत्वादिति चेन्न, तेषां क्रत्वङ्गकर्त्तृस्तवनपरत्वात्, अङ्गपरस्य वाक्यस्यान्ततोऽङ्गिन्येव पर्यवसानान्नबाधशङ्कावकाशइति प्राप्ते ब्रूमः, ब्रह्मण्येवशास्त्रस्यसमन्वयो न कर्मणि-तस्य जन्यत्वजडत्वपरतन्त्रत्वादियोगात्, न शास्त्रविषयं, प्रत्युततद्भावापत्तिलक्षणमोक्षोपायभूतज्ञानोत्पादने एव कर्मण उपयोगश्रवणात्, "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेनतपसाऽनाशकेन"त्यादिभिः,

सर्वंकर्माखिलं पार्थज्ञानेपरिसमाप्यते,

इति स्मरणाच्च,

एतेन पूर्वबाधशङ्कापिदूरतोनिरस्ता, विशेषस्तु आकरे द्रष्टव्यः, स्यादेतत्, अखिलस्यापिशास्त्रस्य ब्रह्मण्येवसमन्वयः, तस्यचतद्विषयत्वं, तथाऽपि कीदृशं ब्रह्म वेदान्तस्य विषयः, औपाधिकभेदाश्रयं वा, कल्पितभेदाश्रयं वा, केवलभेदाश्रयं वा, चिदाचिद्विशिष्टं वा, स्वाभाविकभेदाभेदाश्रयंवेति, नाद्यः अनुपपन्नत्वात्, तथा हि सार्वज्ञादिस्वाभाविकधर्माश्रयस्य परब्रह्मण उपाधिना जीवभावापत्तिस्तत्वमस्यादिवाक्योपदेशजन्याभेदज्ञानात्तन्निवृत्याचमोक्षइति तस्य राद्धान्तः, अत्र प्रष्टव्यः, उपाधिना ब्रह्मणः सार्वज्ञादिधर्मा आवृताः, स्वरूपं वा, नाद्यः असम्भवात् तथा हि सार्वज्ञादयोधर्माः स्वाभाविका औपाधिकावा नान्त्यः, औपाधिकत्वे उपाधेस्सत्वमसत्वं वा, सत्यत्वेऽपि ब्रह्मभिन्नत्वमभिन्नत्वं वा, भिन्नत्वेस्वप्रयुक्तोऽन्यप्रयुक्तो वा, ब्रह्मप्रयुक्तो वा, नाद्यो वक्तुं शक्यः, आत्माश्र-

यात्, नापि ब्रह्मप्रयुक्तो ऽन्योन्याश्रयात्, नाप्यन्यप्रयुक्तोऽनवस्था-
नात्, अभिन्नत्वेचौपाधिकभेदसिद्धान्तभङ्गात् उपाधिरेव ब्रह्मेति
प्रतीत्यापत्तेश्च, नाप्यसत्यः परमतप्रवेशात् अनभ्युपगमाच्च, स्वा-
भाविकत्वपक्षे तेषां स्वरूपभिन्नत्वमभिन्नत्वं वा भिन्नाभिन्नत्वं वा,
अत्यन्तभेदे शास्त्रविरोधः, "एवं गुणान् पृथक् पश्यन्" इत्या-
दिनिषेधश्रवणात्, नाऽप्यभिन्नत्वम् ब्रह्मणा तेषां सामाना-
धिकरण्यापत्त्या "आनन्दं ब्रह्मणोविद्वा" निति व्यधिकरणश्रुति-
व्याकोपात् नापि चरमः स्वाभाविकभिन्नाभिन्नानामावरणास-
म्भवात्, अस्मन्मतप्रवेशाच्च, अन्यथास्वरूपस्याप्यावरणापत्तेः,
स्वरूपावरणाभ्युपगमपक्षे सार्वज्ञादिहानेः, किञ्चोपाधेरपि सत्व-
नित्यत्वाभ्यामनिवृत्तिप्रसङ्गात्, तस्माद् दुरुपपादोऽयमौपाधिक-
भेदाभेदः, नापि कल्पितभेदवादः सम्भवति महादोषयोगात्, तथा
हि ब्रह्मणि भेदकल्पनायां कोवाप्रयोजकः ब्रह्मवा उपाधिर्वा अन्य-
द्वा,नाद्यः शुद्धबुद्धनित्यमुक्तविशेषशून्ये वस्तुनि प्रयोजकत्वाभ्युपगमे-
निर्विशेषत्वशुद्धत्वादिनाशात् मुक्तस्यापिभूयोऽज्ञानयोगापत्तेदुर्वार-
त्वात् किं च प्रयोजकस्य ब्रह्मणोनित्यत्वेन प्रयोज्यस्यापि नित्य-
त्वादनिवृत्त्यानिर्मोक्षप्रसङ्गात् द्वितीये आत्माश्रयापत्तेः द्वितीया-
द्युपाध्यङ्गीकारे अन्योन्याश्रयादियोगात् नापि तृतीयः अन्यस्य
जीवस्य तत्कार्यत्वेनोत्तरभावित्वात् तस्मात्प्रयोजकाभावात्कल्प-
नासिद्धाभेदस्य कल्पितत्वासम्भवात् अविद्यादेर्भिन्नं ब्रह्म देहा-
देर्भिन्नं चेतनमित्यादौ भेदस्य त्वयाऽपि सत्वाभ्युपगमात् अ-
न्यथा अविद्यादिभ्यो ब्रह्मणो देहादिभ्यश्चेतनस्य चापरत्वासिद्धे-
रिति संक्षेपः, नापि केवलभेदाश्रयत्वं ब्रह्मण इति समीचीनं
श्रुतिशतविरोधात् तद्व्याकोपात् "सर्वं तं परादा"दित्यादिभेदनि-
न्दाश्रवणाच्च, किञ्चाऽभेदोऽपि सदेव ब्रह्मणि, गुणगुणिनोर्देहदेहि-
नोश्चाभेदस्य त्वयापि याथात्म्याङ्गीकारात्, अलंविस्तरेण, नापि
चिदचिद्विशिष्टं ब्रह्म वेदान्तविषय इति पक्षो रमणीयः चिद-
चितोर्विशेषणत्वासम्भवात्, तथाहि व्यावर्त्तकत्वं ताविद्विशेषणत्व-
मिति सर्वतन्त्रसम्मतलक्षणं तस्य चानयोरनन्वयात् विशेषण-
त्वासिद्धेश्च व्यावृत्तव्यावर्त्यसिद्धिसापेक्षत्वाद्विशेषणस्य तथा च
व्यावृत्तस्य ब्रह्मणश्चिदचितोर्व्यावर्त्तकत्वाभ्युपगम्यमानेऽपि कस्मा-

द्यावृत्तमिति व्यावर्त्त्योर्विवेचनीयः चेतनाचेतनयोर्विशेषणत्वाभ्युपगमेन व्यावर्त्तकत्वात् पदार्थान्तरस्याभ्युपगमाच्च, किञ्च चेतनाचेतने सार्वज्ञादिविशिष्टस्य विशेषणे भवतः केवलस्य वा, नाद्यः विशिष्टवैशिष्ट्यापत्त्या विशिष्टसिद्धान्तभङ्गात् न द्वितीयः केवलत्वानभ्युपगमात्, अभ्युपगमे च सार्वज्ञादिविशिष्टंब्रह्म भिन्नं चेतनाचेतनविशिष्टं च भिन्नमिति विशिष्टद्वयसिद्धौ सत्यां विशिष्टाद्वैतभङ्गात्, चेतनाचेतनविशिष्टदेशस्य सार्वज्ञादिहीनापत्तेश्च निर्विशेषवादप्रवेशप्रसङ्गाच्च, अलंविस्तरेण, तस्मात्स्वाभाविकभेदाभेदाश्रयभूतमेव परब्रह्म श्रीपुरुषोत्तमो वेदान्तविषय इति सिद्धम्, "एकः सन् बहुधा विचचार" "एको देवो बहुधा सन्निविष्टः" "त्वमेको सि बहुधा बहून्प्रविष्ट" इत्यादिश्रुतिभ्यः, ।

एकत्वे सति नानात्वं नानात्वे सति चैकता ।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति ॥
केचिद्बहुत्वेन वदन्ति देव–
मेकात्मना केचिदिमं पुरातनम् ॥
वेदान्तसंस्थापितसत्वयुक्तम् ।
द्रष्टुं तमीशं वयमुद्यताः स्म ॥
इत्यादिस्मृतेः ।

"अंशोनानाव्यपदेशा""दन्यथा चापिदासकितवादित्वमधीयते" "एक उभयव्यपदेशात्त्वहिकुण्डलवदित्यदिसूत्राच्च । ननु भेदप्रयुक्तो ऽभेदस्तत्प्रयुक्तश्च भेद इति स्वाभाविकभेदाभेदपक्षस्याप्यन्योन्याश्रयदोषग्रस्तत्वात् अवच्छेदकाभावाच्च कथं निर्दोषत्वमिति चेन्न, न तावद्भेदाभेदनिरूपणे भेदाभेदयोः प्रयोज्य प्रयोजकत्वं येनोक्तदोषप्रसङ्गः, स्यात् अपि तु स्वतन्त्रपरतन्त्र सत्वनिर्णयोपयिकयोर्नियन्तृत्वनियम्यत्वयोः सत्त्वान्नोक्तदोषसंसर्गावकाशः, आत्मा हि परमस्वतन्त्रोऽधिगुणः, "सर्वस्य वशीसर्वस्येशानः" "एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" "भीषास्माद्वातः पवते भीषोदेति सूर्यः" "अज्ञोजन्तुरनीशश्च आत्मनः सुखदुःखयोः" "ईश्वरप्रेरितोगच्छेत्स्वर्गं वाश्वभ्रमेव वे"त्यादिश्रुतिभ्यः, नाप्यनुगतावच्छेदकाभावः, अखण्डोपाधिरूपानुगतावच्छेदकस्य सत्वा-

त्, ननु स्वाभाविकभेदाभेदवादेपि ब्रह्मणः स्वत एव जीवभावाभ्युपगमात् गुणवद्दोषाश्च स्वाभाविका भवेयुरिति निर्दोषब्रह्मतादात्म्योपदेशा विरुद्धा एवेति चेन्न, स्वरूपतो जीवेशयोरभेदानभ्युपगमात्, तथा हि ब्रह्मणश्चेतनाचेतनयोश्च स्वरूपेणा ऽभेदाभावः इतरेतरात्यन्तविलक्षणत्वात् "अस्थूलमनणु" इत्यादिश्रुतेः, तत्र चेतनस्याणुत्वेन निर्देशार्हत्वम् अचेतनस्य स्थूलत्वेन ब्रह्मणश्च तयोर्विलक्षणत्वेनेतिविवेकः, एवमेव तस्य तयोश्चसर्वात्मत्वसर्वनियन्तृत्वसर्वव्यापकत्वस्वतन्त्रसत्वसर्वाधारत्वादियोगेन ब्रह्मात्मकत्वतन्नियम्यत्वतद्व्याप्यत्वतत्तन्त्रसत्वपराधेयत्वादियोगेन चाभेद इतिसिद्धान्तजाह्नव्यां श्रीदेवाचार्यपादैर्दत्तोत्तरत्वात्, विशेषश्च तत्रैव द्रष्टव्यः, ननु भेदाभेदयोरितरेतरविरुद्धत्वात्कथंसामानाधिकरण्यमिति चेन्न, श्रुतिगम्यत्वात न तर्केण परास्तुं शक्यः, अन्यथा "ऽणोरणीयान्महतोमहीया" नित्यादिपरस्परविरुद्धत्वाद्धेयमेव भवद्भिर्वैदिकैः, न च तेषां श्रुतिप्राप्तत्वाद्व्यवस्थयैव भाव्यमन्यथाश्रुतिवाध इति वाच्यम्, प्रकृतेपि तुल्यत्वात् इत्यलं विस्तरेण, विशेषस्तु श्रुत्यन्तकल्पवल्ल्यामुक्तः, एतेषां संशयानां नाशक इत्यर्थः, चकारो विपर्ययादिसमुच्चयार्थः । भिन्नाभिन्ने स्वाभाविकाचिन्त्यानन्तकल्याणगुणाब्धौ ब्रह्मणि औपाधिकभेदाश्रयत्वकल्पितभेदाश्रयत्वकेवलभेदाश्रयत्वविशिष्टाद्वैतत्वादिपक्षेष्वेकतमस्य कल्पनं निर्गुणत्वमायाकल्पितगुणवत्त्वं वा विपर्ययज्ञानं श्रुतिविरुद्धत्वादनुपपन्नत्वाच्च, एवमन्यदप्यनुसन्धेयं, तथा भूतविपर्ययान् भिनत्तीति विपर्ययभेत्तेति चकारार्थः, ।

तत्रहेतुमाह—

सर्वागमविशारद इति ।

सर्वेष्वपि आगमेषु शास्त्रेषु विशारदो निपुणः नित्यमुक्तत्वेनापरिच्छिन्नज्ञानत्वात् "सदा पश्यन्ति सूरय" इतिश्रुतेः, पदवाक्यप्रमाणनिर्णयविषयककौशल्यासाधारणाश्रयः, अन्यथा संशयभेत्तृत्वासम्भवात्, हेतुहेतुमद्भावो वात्र विवक्षितः' सर्वसंशयभेत्तृत्वात्सर्वागमविशारदः, सर्वागमविशारदत्वाद्वा सर्वसंशयभेत्तेत्यर्थः "सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठ"मितिश्रुत्युक्तलक्षणं वाऽत्र विवक्षितं, तथा च श्रोत्रियपदस्य सर्वाग-

मविशारद इति व्याख्यानम्, ब्रह्मनिष्ठमिति पदस्य सर्वसंशयभेत्तेतिबोध्यम्, उभयविधानावच्छिन्नानुभूत्यसाधारणाश्रयत्वादाचार्यपादानामिति संक्षेपः, ॥ ९ ॥

कालादिसम्बन्धाभावंदर्शयन् नित्यमुक्तत्वंदर्शयति—

कालकर्मगुणातीतइति ।

कालकर्मगुणातीतः सर्वदाचारतत्परः ॥
श्रीकृष्णस्यकृपापात्रं प्रेमसंपुटपुष्कलः ॥ १० ॥

कालः भूतभविष्यद्वर्त्तमानचिरक्षिप्रादिप्रत्ययासाधारणहेतुः प्राकृतद्रव्यादेः तत्सम्बद्धचेतनस्वभावादेर्ज्ञानसङ्कोचादेश्च परिणमनादिहेतुश्च, कर्माणि सञ्चितक्रियमाणप्रारब्धरूपाणि पुण्यापुण्यलक्षणानि, गुणाः सत्वरजस्तमांसि, उपलक्षणं चैतत् क्लेशतापविकारादीनां, तत्र क्लेशः पञ्चधा, "अविद्यास्मितारागद्वेषाभिनिवेशाः" "तापास्त्रिधा, अध्यात्मिकाधिदैविकाधिभौतिकभेदात्, विकारःषड्विधः, जन्मास्तित्ववृद्धिपरिणामापक्षयनाशभेदात् , तत्प्रयोजकप्रकृतिसम्बन्धश्च, एभ्योतिक्रान्तः, सर्वदेति अत्रान्वेतव्यः, एतेन नित्यमुक्तलक्षणमप्युक्तं भवति, त्रैकालिकसंसारदुःखविषयकसामान्यज्ञानानाश्रयत्वे सति सदैव स्वभावतो भगवदनुभावितत्तत्स्वरूपगुणादिविषयकानुभववत्त्वं तत्त्वम्, अस्य च तत्र समन्वयात् तथात्वमित्यनवद्यम्,

किञ्च सर्वदाचारतत्परइति ॥

सर्वस्मिन्नपि काले भगवच्छास्त्रोक्ताचारपरायणः यद्वा सर्वदश्चासावाचारतत्परश्चेतिविग्रहः, सर्वभ्यो भक्तेभ्यो वाञ्छितं ददातीति सर्वदः, यद्वा सर्वं पुरुषार्थं ददातीति तथोक्तः, यद्वा सर्वमनाचारतन्मूलदोषं सदाचारप्रतिबन्धकं द्यतिखण्डयतीति तथा, यद्वा सर्वानपि स्वाश्रितान् तद्बुद्धींश्च स्वानुग्रहेण दायति शोधयतीति तथोक्तः सर्वदः, आचारः शास्त्रोक्तभागवतधर्माचरणरूपः स एव परः प्रधानं यस्य स चासौ सचेत्यर्थः,

अत एव श्रीकृष्णस्य कृपापात्रम् इति ।

सर्वदेशकालादिषु तदनुकूलाचारपरत्वादेव तस्य प्रेष्ठः ।

किञ्च प्रेमसम्पुटपुष्कल इति ।

प्रेम्णो भगवदीयगुणादिविषयकस्य सम्पुटः स चासौ पुष्कलश्चेति विग्रहः सदैवाविर्भूतभगवद्विषयकानुभूतित्वात् ॥ १० ॥

निर्विकारत्वं दर्शयन्नाह

तारुण्यमित्यादिना ।

तारुण्यं वयसा प्राप्तो न विकारमनाः क्वचित् ।
एतत्सुमहिमा कोऽपि विरलो दृश्यते भुवि ॥११॥

वयसातारुण्यं प्राप्तोपि कालॆ विकारमना न भवति भवानिति संवन्धः विकारहेतोः प्रकृतिसंवन्धादेरभावात् ब्रह्मवत् ।

तथाभूतस्यात्यन्तदौर्लभ्यं दर्शयन्नन्यानपि अवताराविशेषान् सूचयन्नाह ।

एतत्सुमहिमेति ।

एष सुष्ठु महिमा यस्य स तथा भूतो भवादृशो भुवि विरलो दृश्यते न वहव इति यावत्, "एष महिमा ब्राह्मणस्य न कर्मणा वर्द्धतेनोकनीया"निति श्रुतेः ॥ ११ ॥

अथ स्वभक्तानां साधनाभावेऽपि पुरुषार्थसाधकत्वं श्रीभगवत आचार्यस्य व्यञ्जयन्स्तौति ।

किंदुरापादनं तेषां कृष्णमार्गानुवर्त्तिनामिति ।

किंदुरापादनं तेषां कृष्णमार्गानुवर्त्तिनाम् ।
असिद्धमपि सिद्धं स्यात्तत्कृपापाङ्गवीक्षणैः ॥१२॥

कृष्णस्य मार्गोऽत्रा ऽऽचार्योपदिष्टसम्प्रदायाश्रयणम्,

तदनुवर्त्तिनां दुरापादनं दुःसाध्यं किं न किमपि दुःसाध्यमित्यर्थः, कुत इत्यत्राह असिद्धमपि सिद्धं स्यादिति, अनेकैरप्युपायैरप्यकृतात्मभिः सत्सम्प्रदायशास्त्राचार्यपराङ्मुखैरसिद्धमप्राप्यमपि तेषां तत्साधनाभावेऽपि सिद्धं स्यादिति ।

यावैसाधनसम्पत्तिः पुरुषार्थचतुष्टये ।

तया विना तदाप्नोति नरोनारायणाश्रयः ।

इत्यादिस्मृतेः ।

ननु साधनं विना फलं सिद्धिः कथमसम्भवात् अन्यथा

सर्वेषामपि तदापत्तिर्दुर्वारा साधनाभावाविशेषादित्याशङ्कानिरासार्थमाह,

तत्कृपापाङ्गवीक्षणैरिति ।

तस्य कृपया सह अपाङ्गः कटाक्षस्तेन वीक्षणानि तत्कृपापाङ्गवीक्षणानि तैः तस्य कृपार्द्रकटाक्षावलोकनैरित्यर्थः, "यमेवैषवृणुते तेन लभ्य" इति श्रुतेः,

तत्प्रसादादवाप्नोषि शाश्वतं पदमव्ययम् ।

तत्प्रसादात्परां शान्ति स्थानं प्राप्स्यसि शाश्वतम् ।

इति श्रीमुखोक्तेः ॥ १२ ॥

अथ गुणान्तरमाह—

त्यक्तसर्वदुराचार इति ।

त्यक्तसर्वदुराचारः कृष्णचर्यापरिग्रहः ।
भावनाशुद्धसर्वत्रः पक्षपातविवर्जितः ॥१३ ॥

त्यक्तस्त्याजितः सर्वेषां स्वाश्रितानां दुराचारो येन सः सदाचारोपदेष्टृत्वात्, यद्वा लोकदृष्ट्यैषोक्तिः, सर्वोऽपि दुष्टो विपर्यय आचारो यस्य स सर्वदुराचारो वाह्यान्तःकरणवर्गो बुद्धीन्द्रियादिगणः "पराञ्चिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नान्तरात्म" न्निति श्रुतेः, त्यक्तः सर्वदुराचारः पराङ्दृष्टयसाधारणहेतुः करणवर्गो येन सः संयमितवाह्यान्तःकरण इत्यर्थः, यद्वा सर्वैर्दुराचारैस्त्यक्त इति त्यक्तसर्वदुराचारः सुदर्शनावतारत्वेना ऽसह्यतेजस्त्वात् तत्सकाशात्सर्वेदुराचाराः स्वयमेव पलायिताः, यथा प्रदीप्ताग्नेरिववनंत्यरस्कामृगादिशोदिशोधावन्ति तद्वादित्यर्थः,

किञ्च कृष्णचर्यापरिग्रह इति ।

कृष्णचर्या एव परिग्रहः परिकरो यस्य सः नैष्ठिकत्वात् संग्रहान्तरशून्य इत्यर्थः, यद्वा कृष्णाचर्यायै एव परिग्रहः संग्रहो यस्य न स्वार्थे परार्थ वेति, यद्वा कृष्णचर्यायै तत्प्रवृत्यर्थमेव परिग्रहोऽवतारो यस्यसः ।

किञ्च भावनाशुद्धसर्वत्र इति ।

भावनया जीवोद्दिधीर्षालक्षणया शुद्धो भावनाशुद्धःसर्वत्रः स-चासौ सचेति विग्रहः, यद्वा भावनयास्वोद्दिष्टश्रीकृष्णध्यानसन्तत्या कृत्वा शुद्धान् विगतरागादिदोषान्सर्वानपि स्वाश्रितांस्त्रातीति त-थोक्तः, विसर्गाभावपाठेसम्बोधनं तद्भावेच विशेषणमिति द्विवि-धोपिपाठः समञ्जसः समानार्थश्च वोध्यः।

गुणान्तरमाह—

पक्षपातविवर्जित इति।

असौशत्रुरसौमित्रमितिपक्षपातः पशुतुल्यानांदेहात्माभिमानिनां यथा भवति तेनशून्यः रागादिविषयरहित इत्यर्थः, ननु तर्हि कथमाचार्यत्वाधिकारनिर्वाहस्तस्यानुग्रहनिग्रहादिसाध्यत्वात् त-द्योगे च वैषम्यादेरवश्यम्भावित्वात्कथं पक्षपातशून्यत्वमिति चे-त्सत्यम् भगवदवतारवत् सर्वस्यापि सामञ्जस्यात् तद्धितार्थं तेषां निग्रहा न वैषम्यावहः अन्यथाश्रीपुरुषोत्तमेऽपि तत्प्रसङ्गस्य दुर्वा-रत्वादिति सङ्क्षेपः ॥ १३ ॥

अथ गुणविशेषान्दर्शयन्नाह—

सत्यवागिति।

सत्यवाक् सत्यसङ्कल्पः कृतसिद्धान्तनिर्णयः।
वृद्धसेवी वृद्धिकर्त्ता भर्त्ता सर्वस्य पालकः॥ १४॥

सत्यावाचो यस्य सः यथार्थवक्तेतियावत् अनेन तस्याप्तत्वमुक्तं भवति नित्यमुक्तत्वेन बुद्धिमान्द्यदुराग्रहादिभिराप्तत्वप्रतिभटैः स-दैवास्पृष्टमाहात्म्यत्वात्।

अत एव सत्यसङ्कल्प इति।

अथ पूर्वोक्तसर्वशास्त्रविशारदत्वं व्यञ्जयन्नाह—

कृतसिद्धान्तनिर्णय इति।

कृतोवेदानां सिद्धान्तनिर्णयो येन सः, यद्वा कृतीछेदने इत्यस्य-धातोः प्रयोगः कृत्तः छिन्नः सिद्धान्तविरोधिनां निर्णयोयेनसः,

किञ्च वृद्धसेवीति।

वृद्धाः ज्ञानादिवृद्धाः श्रीनारदादयस्तान् सेवनशीलः, यद्वा

वृद्धो गुणशक्त्यादिभिर्वृहत्तमो भगवान्वासुदेवः परब्रह्मशब्दाभिधेयः, "वृहन्तो गुणा अस्मि"न्नितिश्रुतेः तं सेवनशीलः;

किञ्च वृद्धिकर्त्तेति ।

स्वाश्रितानां वृद्धिं वृहद्ज्ञानप्रकाशरूपां करोतीति तथा

किञ्च भर्त्तेति ।

ज्ञानभक्त्यादिना भक्तान् विभर्त्तीति ।

तत्रहेतुः सर्वस्यपालक इति ।

"सर्वे श्रेयांसिपश्यन्तु" इत्यादिशास्त्रोक्तसर्वविषयकश्रेयःसङ्कल्पपूर्वकोपदेशप्रभावेन सर्वस्य जगतो भाविश्रेयस्कस्य पालक इति भावः ॥ १४ ॥

किञ्च मन्दानां शाठ्यनिर्वृत्त्या सर्वसौभाग्यदायक इति—

मन्दानां शाठ्यनिर्वृत्त्यासर्वसौभाग्यदायकः ।
आचारवैरिणो हन्ता कार्यसिद्धिप्रदायकः ॥ १५ ॥

मन्दा अल्पबुद्धयस्तेषां शाठ्यं शठस्य भावो वञ्चकता तस्यनिर्वृत्त्यानिवारणेन सुष्ठुभगः षाड्गुण्यं यस्य स सुभगः भगवान् श्रीकृष्णः

ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसः श्रियः ।

ज्ञानवैराग्ययोश्चैव षण्णां भगइतीङ्गना ।

इति श्रीपराशरोक्तेः ।

सुभगस्य भगवतो भावः सौभाग्यं परं श्रेयः मोक्षः सर्वस्मै तस्यदायकः ।

किञ्च आचारवैरिणोहन्तेति ।

आचारः शास्त्रोक्तसदाचारः भागवतधर्मस्तस्य वैरिणो बाह्यास्तान्त्रिकावा राक्षसावा तान् हन्तीतितथासः ।

किंच कार्यसिद्धिप्रदायक इति ।

क्रियते इति कार्याणि अनुष्ठेयानि पुरुषार्थसाधनानि कर्मज्ञानादीनि तेषां सिद्धिस्तत्प्रतिबन्धकनिरासेन स्वरूपसंपत्तिस्तांप्रकर्षेणददातीति तथासः ॥ १५ ॥

किं च आचारभ्रष्टजीवानां शनैर्युक्त्याप्रबोधयन्निति ।

आचारभ्रष्टजीवानां शनैर्युक्त्या प्रबोधयन् ॥
भगवन्मार्गशुद्ध्या च कृतार्थीकृतभूतलः ॥ १६ ॥

आचारः संप्रदायशास्त्रोक्तधर्मानुष्ठानं तस्माद्भ्रष्टाश्च्युतास्तद्धीना इति यावत् ते च ते जीवाश्च तेषामनादिकालाद्धर्महीनानां शनैस्तत्तदधिकारानुसारेण तत्तद्बुद्ध्यनुसारेण च क्रमशः यथामन्दोपि जानीयात्तथा भूतया युक्त्या भगवत्प्राप्तिसाधनपरम्परोपदेशेनेत्यर्थः अकृतार्थम् कृतार्थं क्रियते इति कृतार्थीकृतं भूतलं येनसः ॥ १६ ॥

संप्रदायविमुखान् शोचन्नाह—

हतलोकोयमिति ।

हतलोकोऽयमज्ञः स्याद्वर्त्तमाने विभावसोः ॥
आचार्यरूपिणः सम्यक् जाड्यशीतेन दाह्यते ॥ १७ ॥

वर्त्तमानेसमये आचार्यरूपिणो विभावसोः शरणं विनाऽयं हतलोकः स्यादित्यध्याहृत्यान्वेतव्यं,"पृथक् विनानाने"ति सूत्रात्पञ्चमी, अयं जीवसंघातः हता नष्टा लोका यस्य सः यद्वा हतालोकः प्रकाशोज्ञानं यस्य सः तथाभूतः सन्नज्ञः स्यात्, सम्भावनायां लिङ् ।

अज्ञत्वेहेतुमाह—

जाड्यशीतेन दाह्यते इति ।

जडस्य भावो जाड्यं तदेव शीतं तेन दाह्यते जडीकृत्य नाश्यते इत्यर्थः ।

तथा च मोक्षधर्मेजनकः ।

नविनागुरुसंबन्धं ज्ञानस्याधिगमः कृतः ॥

गुरुः पारयिता तस्य ज्ञानं प्लवमिहोच्यते इति ॥ १७ ॥

सर्वानप्युपदिश्य वात्सल्याद्यसाधारणगुणयोगात्तद्धितश्रुत्युक्तासाधारणश्रेयःसाधनमुपदिशन्नाह—

सत्यवाक्यं च शृणुतेति ।

सत्यवाक्यं च शृणुत त्यक्त्वा तर्कवितर्कताम् ॥
आचार्यशरणं यात कलौ निस्तारहेतवे ॥ १८ ॥

हे जना इति सम्बोधनमध्याहर्त्तव्यं, हे जनाः भवतां हितोप-

देष्टुरुद्दिधीर्षोर्मम सत्यं यथार्थमबोधितविषयकं वाक्यं शृणुत।

किं तद्वाक्यम्, अस्माकं हितं चेतर्हि कथ्यतामित्यत्राह—

तर्कवितर्कतां त्यक्त्वा आचार्यशरणं यातेति।

तव वाक्यर्थाङ्गीकारे श्रेयोऽस्माकं स्याद्वानवेत्यादि सङ्कल्पविकल्पादिकं संशयं विपर्ययादिरूपमयथार्थत्वं वा त्यक्त्वा, "संशयात्माविनश्यति" "नायंलोकोऽस्ति न परो न सुखं संशयात्मन" इत्यादिशास्त्रात्, "सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" "आचार्यदेवोभवे"त्यादिश्रुतेः, "आचार्योपासनं शौच"मिति भगवदुक्तेश्च, ।

तत्प्रयोजनमाह—

कलौनिस्तारहेतव इति।

संसारादिति शेषः, संसारभ्रमणदुःखनाशार्थमिति यावत् कलिशब्दप्रयोगादस्मिन्युगे आचार्याश्रयणस्य मुख्यत्वं द्योतितम्॥१८॥

वात्सल्यादिगुणान् दर्शयन्नाह।

भक्तानुग्रहकर्त्ताचेति॥

भक्तानुग्रहकर्ता च सर्वसौख्यप्रदः शुभः॥
वालवोधी कृपादृष्टिर्निर्वृत्तरहितः परः॥ १९॥

भक्तेभ्यः आत्मानन्यभजनशीलेभ्योऽनुग्रहकर्त्ता, अनुग्रहोनामस्वात्मीयतयानुग्रहणमात्मसात्करणम् आत्मसात्कर्त्तेत्यर्थः—

अनुग्रहफलमाह।

सर्वसौख्यप्रद इति।

सर्वं सौख्यं मोक्षलक्षणं ददातीति तथा, यद्वा सर्वेभ्यः सौख्यं प्रददातीति तथा,

अतः शुभ इति, सर्वमङ्गलमूर्तित्वात् स्वयं कल्याणरूपः।

किञ्च वालवोधीति, वाला अज्ञाः शास्त्रसंस्कारवर्जितास्तान् वोधनशीलः।

किञ्च कृपादृष्टिरिति, सौम्यदृष्टिरित्यर्थः।

किञ्च निर्वृत्तराहित इति, नितरांवर्त्तते इति निर्वृत्तः प्रकृतिसंवन्धस्तद्रहितः नित्यमुक्तत्वात्, अत एव परः पूर्णः श्रेष्ठो वा, ॥१९॥

किञ्च आकारोभक्तिमार्गस्येति ।

आकारो भक्तिमार्गस्य भेदरत्नसमन्वितः ॥
अनन्तभावभक्तिश्च लभ्यतेऽत्र समाहितः ॥ २० ॥

निगमनस्थानं भक्त्युत्पत्तिस्थानमित्यर्थः ॥

किञ्चभेदरत्नसमन्वित इति ।

भिद्यतेऽनेनेति भेदः साक्षात्काररूपानुभवः संशयविपर्ययकोश-हृदयग्रन्थिभेदकत्वात् ।

भिद्यतेहृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्यकर्माणि तस्मिन्दृष्टेपरावरे ॥

इति श्रुतेः ।

स एव रत्नरूपस्तेन समन्वितो भूषित इति ॥

किञ्च अनन्तभावभक्तिश्चलभ्यतेऽत्रेति ।

अत्र भगवति श्रीमदाचार्ये भगवद्रूपे अनन्तभावभक्तिर्लभ्यते अनन्तोऽपरिच्छिन्नो भावः स्वभावो यस्याः सा अनवच्छिन्नस्वभा-वा भक्तिरित्यर्थः यद्वा त्वत्तः सकाशात् अत्र भगवति रमानिवासे श्रीकृष्णे विषयेऽनन्तभावभक्तिस्त्वद्दीयमाना त्वदनन्यभक्तैर्लभ्यते प्रा-प्यत इति योजना ।

तत्र हेतुमाह—

समाहित इति ।

भवान्सर्वेष्वपि कालेषु स्वाश्रितानां परभक्तिदाने समाहितः सावधानः एतदर्थकावतारत्वाद्भवत इत्यर्थः ॥ २० ॥

किञ्च स्वार्थहीन इति ।

स्वार्थहीनः परार्थी च महोदारदयानिधिः ॥
यौवनैश्वर्यसामग्री येन विष्णौ निवेदिता ॥ २१ ॥

स्वस्मै अर्थ्यन्ते इष्यन्ते इति स्वार्थाः शब्दादयो विषयास्तै-र्हीनस्तत्संकल्पशून्यः स्वभावतोऽस्पृष्टवासनासंस्कारत्वात् ।

अत एव परार्थी चेति ।

परेभ्योऽर्थः परार्थः संसारदुःखनिवारणरूपः स विद्यतेऽस्येति

परार्थी संसारचक्रभ्रमणदुःखपीडितजनतोद्धरणार्थवान् जगदुद्दिधीर्षुरित्यर्थः, यद्वा परस्मैभगवतेऽर्थः परार्थः तदाज्ञाप्रवर्त्तनरूपोऽस्य विद्यते स परार्थी भगवदाज्ञारूपभागवतधर्मोपदेष्टेत्यर्थः, परार्थित्वादेव महोदारदयानिधिः, अतिमन्देभ्योऽपि स्वप्रपन्नेभ्यो भगवत्स्वरूपादिविषयकज्ञानदानशीलत्वान्महोदारः "योवाएतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति सकृपण"इतिश्रुत्युक्तकार्पण्यहर्त्तृत्वात्।

कार्पण्यहरणोत्सुक इति वक्ष्यते च।

कथमेवंविधस्वभावः, यतोदयानिधिः, निर्हेतुकपरदुःखदुःखित्वे सति तन्निराचिकीर्षा दया, तस्या निधिः दयासमुद्र इत्यर्थः महोदारश्चासौ दयानिधिश्चेति तथासः, दयागुणवश्यत्वात्प्रपत्तिमात्रेणापि तत्तदभीष्टं ददातीति भावः. ननु सर्वोऽपि जनः स्वप्रपन्नाय यथाशक्ति ज्ञानादि ददात्येव दयानिधेः कथं प्रपत्तेरपेक्षा तथात्वे वैषम्यापत्तेर्दुर्वारत्वादिति चेन्न, अप्रार्थितोनगोपाये"दित्यादिशास्त्रात्प्रपत्तिरपेक्षितैव अन्यथा सर्वमोक्षप्रसङ्गात् वैषम्यस्य तु पक्षपातविवर्जित इत्यस्मिन्पदेव्याख्यायामेवपरिहृतत्वादलंविस्तरेण,।

इदानीं—

या वै साधनसंपत्तिः पुरुषार्थचतुष्टये ॥
तया विना तदाप्नोति नरो नारायणाश्रयः।

इत्यादिशास्त्रात्, साधनेषु प्रपत्तेरेव प्राधान्यं दर्शयन् तदेव संप्रदायनिष्ठान् शिक्षयंश्च आचार्यकृतां तामेव प्रपत्तिं दर्शयति।

यौवनैश्वर्यसामग्री येन विष्णौ निवेदितेति।

येनभगवताऽऽचार्येण यौवनैश्वर्यसामग्री विष्णौ सर्वेश्वरे श्रीकृष्णे निवेदिता सोऽस्मदादीनामुद्धर्ते त्यध्याहृत्य योजनीयं, "ममोद्धर्त्ताभवार्णवा"दितिवक्ष्यति, यौवनं चैश्वर्यं चानयोः समाहारः यौवनैश्वर्यं, तच्च भुक्तिमुक्त्योरुपायत्वात्सामग्रीत्युक्तम् , तत्र यौवनं यूनो भावः कर्म वा विग्रहबलचेष्टादिकम्, ऐश्वर्यम् निग्रहादिसामर्थ्यं—

निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानता।

इत्यनन्तरमेव वक्ष्यते।

तत्सर्वं भगवति निवेदितम्।

त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् , ॥

इत्यादिशास्त्रात्, तदनुवृत्यर्थकावतारत्वात् तस्योपलक्षणं चै-तदात्मनोऽपि, तथा च आत्मात्मीयं सर्वं भगवदर्थमेव, आत्मात्मी-यभरन्यासो भगवति कृत इत्यर्थः ॥ २१ ॥

अथ श्रीमदाचार्ये भगवद्भावं ख्यापयन्नाह—

आचार्यो विष्णुरूपो हि पुराणेष्विति निर्णय इति ।

आचार्यो विष्णुरूपो हि पुराणेष्विति निर्णयः ॥
निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानता ॥ २२ ॥

आचार्यः साक्षाद्विष्णुरूप एव तथात्वे च सर्वैः सदोपास्य इत्यर्थः ।

तत्र प्रमाणमाह—

पुराणेष्विति ।

तथापाद्मे—

देवद्युतिस्तुतौ ।

भक्तिर्यथा हरौ मे ऽस्ति तद्वद्विष्टा गुरौ यदि ॥
समास्थितेन सत्येन स्वं दर्शयतु मे हरिरिति ।

विष्णुधर्मे च ।

देवतायां च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य विष्णुः प्रसीदति ।

यद्वा पुरातनत्वात् पुराणशब्दो वेदवाचक इत्युक्तार्थः, वेदेषु-निर्णयोनामनिर्णीतोर्थः,

गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
"आचार्यदेवोभवे"त्यादिश्रुतेः,
यस्माद्देवो जगन्नाथः कृत्वा मर्त्यमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥
तस्माद्भक्तिर्गुरौ कार्या संसारभयभीरुणेति—
जगदाख्यानसंहितायाम् ॥

पञ्चरात्रे ।

वैष्णवज्ञानवक्तारं यो विद्याद्विष्णुवद्गुरुम् ॥

पूजयेद्वाङ्मनःकायैः स शास्त्रज्ञः स पण्डितः ।
श्लोकपादस्य वक्तापि यतः पूज्यः सदैव हि ।
किंपुनर्भगवद्विष्णोः स्वरूपं वितनोति यः ॥
यावदायुस्त्रयः पूज्याः सिद्धान्तो गुरुरीश्वरः ।
पूर्वं ज्ञानाय पश्चात्तु कृतघ्नत्वापनुत्तये ॥
इति ।
तत्रैवान्यत्रव्यतिरेके ॥
येषां गुरौ च जप्ये च विष्णौ च परमात्मनि ।
नास्ति भक्तिः सदा तेषां वचनं परिवर्जयेदिति ॥
एवमन्यान्यपि वाक्यान्यनुसन्धेयानि,।
ऐश्वर्यासाधारणगुणौ दर्शयन्नाह—
निग्रहानुग्रहाभ्यां वै श्रीकृष्णेन समानतेति ।

यथा श्रीकृष्णः कंसमिथ्यावासुदेवादीनां निग्रहाधिकारिणां निगृहीतवान् पाण्डवोद्धवादीनामनुग्रहाधिकारिणां चानुगृहीतवान् तथैवायमपि भगवत्पराङ्मुखानां शास्त्रबाह्यानां निग्रहं कृत्वा स्वपादभाजां सदाचारवतां ह्यनुग्रहं करोतीति तत्साम्ये दृष्टान्तः,।

"यस्य देवे पराभक्ति"रित्यादिना ऽतिदेशवाक्येन तत्साम्यभक्तिः करणीयतया निरूपिता, विशेषशङ्कातु यथाश्रीभगवदुपासनस्य स्वातन्त्र्येण कर्त्तव्यता श्रुतिशतैर्विधीयते, न तथा ऽऽचार्योपासनेस्येति, न च "समुद्रमेवाभिगच्छे"दित्यादेः सत्वान्नोक्तदोषयोग इति वाच्यम्, तस्य विधिवाक्यस्य पराङ्गत्वेन स्वन्तत्रविधित्वाभावादिति समाधानं तूक्तवाक्यस्य पराङ्गविधानपरत्वेपि गुरोः परमेश्वरत्वश्रवणात्तदैक्यवाक्यतार्थं स्वातन्त्र्यमप्यविरुद्धम्,।

तथोक्तंश्रीनारदपञ्चरात्रे ।
गुरुरेव परं ब्रह्म गुरुरेव परं धानम् ।
गुरुरेव परः कामो गुरुरेवपरायणम् ॥
गुरुरेव परा विद्या गुरुरेव परा गतिः ।
अर्चनीयश्च वन्द्यश्च कीर्त्तनीयश्च सर्वदा ।
ध्यायेज्जपेन्नमेद्भक्त्या भजेदभ्यर्थयेन्मुदा ।
उपायोपेयभावेन तमेव शरणं व्रजेत् ।

शरीरं चासुविज्ञानं वासः कर्मगुणान्वसून् ।
गुर्वर्थं धारयेद्यस्तु स शिष्यो नेतरः स्मृत इति ।
अन्यत्रापि ।
गुरुपादाम्बुजं ध्यायेद् गुरोर्नाम सदा जपेत् ।
श्रीगुरोर्वार्त्ताकथां चैव गुरोरन्यन्न भावयेत् ।
इत्यादिना च गुरूपासनस्य स्वातन्त्र्यविधानादिति संक्षेपः॥२२॥
पूर्वश्लोकेन गुरोः श्रीभगवतासाम्यं निरूपितम्–
शास्त्रमुखेनेदानीं ततोप्याधिक्यमाविष्कुर्वन् श्रीगुरुंस्तौति ।
हरौरुष्टइति ।

हरौ रुष्टेगुरुस्त्राता गुरौ रुष्टे न कश्चन ॥
तस्मात्सर्वप्रयत्नेन प्रसाद्यः सर्वदेहिनाम् ॥ २३ ॥

यद्यपि हरेरप्यसाधारणवात्सल्यादियोगादिना रोषो न भवति तथापि महदपराधादिना तज्ज्ञापनार्थं रोषादिसम्भावना क्रियते जीवादृष्टोपाधिनेतिबोध्यं सचगुरुप्रार्थनया निवर्त्तत इत्याह ।
गुरुस्त्रातेति ।
श्रीगुरौ रुष्टे तु न कोपि त्राणहेतुरित्याह—
गुरौरुष्टेनकश्चनेति ।
वहिर्यामिणि भगवति गुरुरूपे रुष्टे सति साक्षाद्भगवानपि त्राता न भवति कुतोऽन्य इत्यर्थः ।
नारायणोऽपयाति गुरोः प्रच्युतस्य दुर्बुद्धेः ।
कमलं जलादपेतं शोषयति रविर्नतोषयति ॥
इति जयदाख्यानसंहितावचनात् ।
ततः किं कार्यमित्यत आह—
तस्मात्सर्वप्रयत्नेन प्रसाद्यः सर्वदेहिनामिति ।
तस्मादन्यगत्यभावात्सर्वदेहिनामिति सर्वैर्देहिभिरित्यर्थः, सर्व प्रयत्नेन येन केन प्रकारेण गुरुरेव प्रसाद्यः प्रसादनीय इत्यर्थः तत एव श्रेय इति भावः ।
हरौ रुष्टेगुरुस्त्राता गुरौ रुष्टे न कश्चन ।
तस्मात्सर्वप्रयत्नेन गुरुमेव प्रसादयेत ॥

इति पुराणोक्तार्थसङ्ग्रहरूपोऽयं श्लोकः ॥ २३ ॥

तस्माच्छ्रीगुरुर्मर्त्यबुद्ध्या कदापि नाऽवमाननीय इत्यात्मोद्देशेन विश्वं शिक्षयन्नाह—

आचार्ये मानुषी बुद्धिर्न कर्त्तव्या कदाचनेति ।

आचार्ये मानुषी बुद्धिर्नकर्त्तव्या कदाचन ॥
अस्माभिः श्रेय इच्छद्भिर्यतः स्थानं हि श्रेयसाम् ॥२४॥

अस्माभिः आचार्ये श्रीभगवन्मनुजावतारे मानुषीबुद्धिः अस्मदादिवदसावपि मनुष्य एवेति साम्यबुद्धिरध्यवसायः न कर्त्तव्य इति निषेधवाक्यसङ्ग्रहार्थः ।

यो विष्णोः प्रतिमाकारे लोहबुद्धिं करोति वा ।
यो गुरौ मानुषं भावमुभौ नरकपातिनौ ॥

इत्यादिनिषेधशास्त्रात् ।

तत्राधिकारिस्वरूपं दर्शयति ॥

श्रेय इच्छद्भिरिति ।

श्रेयोविमुखानां कामचारिणां व्यावृत्त्यर्थमिदं विशेषणं तत्र हेतुमाह—

यतः स्थानं हि श्रेयसामिति ।

यतः श्रीगुरोः प्रसादाच्छ्रेयसां सर्वमङ्गलानां स्थानं वैष्णवपदं वैकुण्ठाख्यं परमात्मविषयकानुग्रहो वा लभ्यत इति शेषः, यद्वा यतो यस्माद्धेतोः श्रीगुरोः तदुपासनं वा श्रेयसां स्थानं तस्मान्मानुषीबुद्धिस्तत्र कदापि न कर्त्तव्येति योजना "सहिविद्यां जनयति तच्छ्रेष्ठं जन्म तस्मै द्रुह्येन्न कर्हिचि"दितिश्रुतिः, ।

एकाक्षरप्रदातारमाचार्यं योऽवमन्यते ॥
श्वानयोनिशतं प्राप्य चाण्डालेष्वभिजायते ।

इत्यादिस्मृतेश्च" ॥ २४ ॥

इदानीं श्रीमदाचार्याणामनन्तगुणत्वात्तदनुग्रहस्य देशकालादिनिरपेक्षत्वं सर्वसिद्धिहेतुत्वं च निरूपयन्स्तौति ।

यस्मिन्नहनियर्ह्येवेति ।

यस्मिन्नहनि यर्ह्येव करोति कृपयाऽऽत्मसात ॥
तर्ह्येव सर्वसिद्धिः स्यान्न काङ्क्षा तिथिवारयोः ॥ २५ ॥

यस्मिन्निति ।

सामान्यपदप्रयोगः उत्तमदिवसादिव्यावृत्त्यर्थः, कस्मिंश्चिदपि दिवसे इत्यर्थः,

यर्ह्येवेति,

यस्मिन्नपि मुहूर्त्तादौ नक्षत्रतिथ्यादौ न तत्र नक्षत्रतिथ्यादिविचारापेक्षेति अन्ययोगव्यवच्छेदरूपावधारणार्थः, यस्मिन्कस्मिंश्चिदपि दिवसे नक्षत्रमुहूर्त्तादौ वा करोति कृपयाऽऽत्मसात्जीवमित्यध्याहरणीयं कृपयात्मसात्करोति तर्ह्येव सर्वसिद्धिः स्यात् तस्मिन्नेव क्षणे सर्वसिद्धिः स्यादितिवाक्यार्थः, एवकारो ऽन्ययोगव्यवच्छेदार्थक इति स्वयमेव व्यवच्छेद्यं दर्शयति, नकाङ्क्षातिथिवारयोरितिस्पष्टार्थः, नक्षत्रादीनामप्युपलक्षणं बोध्यं, ननु यदि सिद्धिहेतूनां पुष्यादिनक्षत्राणां सिद्धादियोगानां तथैवोत्तमवारतिथ्यादीनामभावस्तर्हि कार्यसिद्धिरपि दुर्निरूप्या कारणाभावे कार्याभावस्य नियतत्वादित्याशङ्क्यात्यन्तायोगव्यवच्छेदार्थकेन तत्र प्राप्तेनैवकारेण परिहरति स्यादेवेति नस्यादिति न अपितुस्यादेवेत्यर्थः,

ननु कारणाभावे कथंसिद्धिरितिचेत्तत्राह—

कृपयेति ।

भवतः श्रीमत आचार्यस्य कृपाकामधेनुरूपायाः प्रधानवीजभूतायाः सत्वान्न कारणाभावशङ्कावकाशइत्यर्थः,

यावै साधनसंपत्तिः पुरुषार्थचतुष्टये ।
तया विना तदाप्नोति नरो नारायणाश्रयः ॥

इतिस्मृतेः ।

"यमेवैष वृणुते तेन लभ्य"इतिश्रुतेः ॥ २५ ॥

अथसंस्कारदातृत्वेन स्तुवन्नाह ।

पञ्चसंस्कारदायीचेति ।

पञ्चसंस्कारदायी च ममोद्धर्त्ता भवार्णवात्
तेषां प्रत्युपकारार्हो न कोपि जगतीतले ॥ २६ ॥

संस्कारो नाम कार्यान्तरयोग्यतापादनं, यथा ब्राह्मणाद् ब्राह्मण्यां जातोपि उपनयनं विनाऽध्ययनयोग्यता नास्ति, तेन चाध्ययन-योग्यतापादनं तथैव तापादिसंस्कारेण भगवत्परिचर्यादियोग्यता-पादनं वैष्णवत्वं संस्कारः,

स च पञ्चविधः ।
तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः ॥
अमी हि पञ्च संस्काराः परमैकान्तहेतवः ।
इतिनारदपञ्चरात्रोक्तेः ॥
तत्र तापो नाम श्रीविष्णोरायुधशङ्खचक्रादिधारणम् ।
तथासामवेदे ।

"पवित्रमग्निः अग्निर्वै सहस्रारः सहस्रारो नेमिः नेमिना तप्त-तनुर्ब्राह्मणः सायुज्यसालोक्यमाप्नोतीति" "सहोवाच याज्ञवल्क्यः तस्मात्पुमानात्महिताय प्रेम्णा हरिं भजेद्यत्सुश्लोकमौलेर्ध-र्माण्यग्निना संधत्ते तस्माद्धामैव ब्रह्मविदाप्नोतिपरमिति" ,,पवित्रं ते विततं ब्राह्मणस्य ते प्रभुर्गात्राणि पर्येषि विश्वतः अतप्ततनु र्नतद्धामाऽश्नुते शृतास इद्वहन्तस्तत् समास" इति "एभिर्वयमुरुक्र-मस्य चिह्नैरङ्किता लोके सुभगा भवेम तद्विष्णोः परमं पदं येऽभि-गच्छन्ति लाञ्छिता"इत्यादि श्रुतिभ्यः ।

तद्धारणनियमस्थानानि चत्वारि ज्ञेयानि ॥
नैमिषे मथुरायां च द्वारवत्यां तथैव च ।
सुदर्शनाश्रमे चैव संस्कुर्याद्देशिकः सदा ॥
तप्तैश्चक्रादिभिर्विष्णोः शिष्यस्वाराज्यलब्धये ।
एषु स्थलेषु चक्रादेराविर्भावः सदा हरेः ॥
इत्यभियुक्तोक्तेः ।
विशेषस्तु गुरुनतिवैजयन्त्यामुक्तः ॥
अन्यत्र स्थलेषु कञ्चित्कालं शीतलमुद्रामेव धारयेदितिभावः ॥
विस्तृतश्च पूर्वाचार्यैस्तत्प्रकारविशेषः श्रीसदाचारप्रकाशे ॥ १ ॥
अथपुण्ड्रम् ।

धृतोर्ध्वपुण्ड्रः परमेशितारं—
नारायणं सांख्ययोगाभिगम्यम् ।
ज्ञात्वा विमुच्यते नरः समस्तैः ॥
संसारपाशैरिह चैव विष्णुम् ।
इति महोपनिषदि ।
धृतोर्ध्वपुण्ड्रः श्रितचक्रधारी ।
स्वरेण मन्त्रेण सदा हृदि स्थितम् ॥
परात्परं यो महतो महान्तम् ॥
इति कमठशाखायाम् ।
तिलकस्वरूपं च यजुर्वेदे हिरण्यकेशिशाखायाम् ॥

"हरेः पादाकृतिमात्मनो हिताय मध्ये छिद्रमूर्ध्वपुण्ड्रं यो धारयति स पुण्यभाग्भवति स मुक्तिभाग्भवती"त्यादिश्रुतिभ्यः ।

तिलकद्रव्यं च प्रधानं गोपीचन्दनमेव श्रौतत्वात् ।

"सहोवाच भगवान्वासुदेवो वैकुण्ठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादिभिर्धारितं विष्णुचन्दनं ममाङ्गे प्रतिदिनमालिप्तं गोपीभिः प्रक्षालनाद् गोपीचन्दनमाख्यातं मदङ्गलेपनं पुण्यं चक्रतीर्थादिसंस्थितं शङ्खचक्रसमायुक्तं पीतवर्णं मुक्तिसाधनं भवति ।

इत्यादिश्रुतिभ्यः ।

तदभावे गङ्गातीर्थाद्युद्भवं तुलसीमूलस्थितं वा द्रव्यमपि ग्राह्यमेवेतिसंक्षेपः ॥ २ ॥

नामेति ।

वैष्णवी समाख्येति यावत्, "अङ्कयेच्छङ्खचक्राभ्यां नाम कुर्याच्च वैष्णवम्" इत्यादिश्रुतेः, तच्च श्रीहरिगुरुतत्क्षेत्रादिसम्बन्धवदेव धार्यं नान्यत्तत्सम्बन्धशून्यं तदन्यसम्बन्धवच्चेतिविवेकः ॥ ३ ॥

मन्त्रस्तुवैष्णवः स्वसम्प्रदायपरंपराप्राप्त एव ग्राह्यो देयश्च, "अमुं पञ्चपदं मनुमावर्त्तयेद्यः स यात्यनायासतः केवलं तत्पदंतत्" इति श्रुतेः, यश्च श्रीरामकृष्णादिमन्त्रा न मुक्तिहेतवस्तदुपासकानां फलविशेषमात्रदायका अपितु नारायणादिमन्त्र एव मोक्षहेतुरिति केषांचित्स्वबुद्ध्युत्प्रेक्षित उद्घोषः स तुच्छ एवानुपपन्नत्वात्, तथाहि श्रीकृष्णादिमन्त्राणां मोक्षहेतुत्वं प्रमाणाभावाद्वा बाधकसत्त्वाद्वेति विवेचनीयं, नाद्यः "अमुं पञ्चपदं मनु"

मित्यादिश्रुतीनां विद्यमानत्वात्, नापिद्वितीयः अप्रसिद्धत्वात्, यदि स्वानुभव एव प्रमाणं तर्हि तद्विपरीतस्यापि वक्तुं शक्यत्वात्, किञ्च श्रीकृष्णमन्त्रस्य मुक्तिसाधकत्वं भवतामनिष्टं तर्हि तच्चरमोपदेशश्लोकस्यापि तद्विषयकत्वेन तुल्ययोगक्षेमात्तस्यानुष्ठानमपि व्यर्थमेव, किमर्थं नित्यजाप्यतया तस्य स्थापनं मन्त्ररहस्येषु संग्रहश्च, किञ्च श्रीनारायणात् श्रीकृष्णादिलीलावताराणां भिन्नत्वमभिन्नत्वं वा भवतामभिप्रेतं, भेदपक्षेऽपि स्वरूपभेदो गुणशक्त्यादितारतम्यं वा, नाद्यः परमेश्वरस्यानेकत्वापत्तेः, ब्रह्मैक्यप्रतिपादकं सर्वमपि वेदान्तशास्त्रं दत्ततिलाञ्जलि स्यात्, गुणशक्त्यादितारतम्याङ्गीकारेऽपि—

मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते ॥
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।
इत्यादिश्रीमुखोक्तयः—
परं ब्रह्म परं धाम पवित्रं परमं भवान् ।
इत्यारभ्य—
सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥

इत्यन्तं श्रीपार्थोक्तयः अथ निरवधिकातिशयकल्याणैकतानानन्तज्ञानानन्दैकस्वरूपः स्वाभाविकानवधिकातिशयज्ञानशक्तिबलैश्वर्यधैर्यतेजःप्रभृत्यसंख्येयकल्याणगुणमहोदधिरित्यारभ्य परब्रह्मभूतः पुरुषोत्तमो नारायणो ब्रह्मादिस्थावरान्तनिखिलजगत्स्रष्टा स्वरूपेणावस्थितो ब्रह्मादिदेवमनुष्याणां ध्यानार्चनाद्यगोचरोऽपारकारुण्यसौशील्यौदार्यमहोदधिः स्वमेव रूपं तत्सजातीयसंस्थानं स्वस्वभावमजहदेव तेषु लोकेष्ववतीर्य तैस्तैराराधितस्तत्तदिष्टानुरूपं धर्मार्थकाममोक्षफलं प्रापयन् भूभारावतारणापदेशेनास्मदादीनामपि संसारदुःखशमनाय सकलमनुष्यनयनविषयतां गत इत्यादिभाष्यारम्भः "मत्तः परतरं नान्य"दित्यस्यापि तथा सर्वस्यापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेतनस्यापि शेषित्वेन कारणतया शेषितया चाहमेव परतरस्तथा ज्ञानशक्तिबलादिगुणयोगेन चाहमेव परः मत्तो व्यति-

रिक्तं सच्चित्ज्ञानबलादिगुणयोगि परतरं नास्तीति भवतामाचार्यभाष्यम् परं ब्रह्म परं धाम इत्यस्य श्लोकस्य भाष्ये उदाहृतानि श्रौतवाक्यानि "यतोवाइमानि भूतानि जायन्ते"इत्यारभ्य "परंज्योतीरूपं सम्पद्ये"त्यन्तानि—

"आहुस्त्वामृषयः सर्वे" इत्यस्य भाष्ये चोक्तानि—
एष नारायणः श्रीमान् क्षीरार्णवनिकेतनः ॥
नागपर्यङ्कमुत्सृज्येहागतो मथुरां पुरीम् ।
पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः ॥
साक्षाद्देवः पुराणोऽसौ स हि धर्मः सनातनः ।
ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ॥
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ।
पवित्राणां हि गोविन्दः पवित्रं परमुच्यते ॥
पुण्यानामपि पुण्यो ऽसौ मङ्गलानां च मङ्गलम् ।
त्रैलोक्यं पुण्डरीकाक्षो देवदेवः सनातनः ॥
आस्ते हरिरचिन्त्यात्मा तत्रैव मधुसूदनः ।
यत्र नारायणो देवः परमात्मा सनातनः ॥
तत्र कृत्स्नं जगत्पार्थ तीर्थान्यायतनानि च ।
तत्पुण्यं तत्परं ब्रह्म तत्तीर्थं तत्तपोवनम् ॥
तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः ।
आदिदेवो महायोगी यत्रास्ते मधुसूदनः ॥
पुण्यानामपि तत्पुण्यं माभूत्ते संशयोऽत्र वै ।
कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ॥
कृष्णस्य हि कृते भूतमिदं विश्वं चराचरम् ।

इत्यादीन्यार्षवाक्यानि दत्ततिलाञ्जलिकानि स्युः, किञ्च गुणशक्त्यादितारतम्याङ्गीकारेऽनीश्वरत्वप्रसङ्गः स्यात् लीलावतारोऽनीश्वरः ऐश्वर्यतारतम्ययोगात् ब्रह्मरुद्रादिवदित्यनुमानात्,

"न त त्समश्चाभ्यधिकश्च दृश्यते ।
नत्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ॥
इत्यादिश्रुतिस्मृतिव्याकोपाच्च ।

अपिच युष्मत्संप्रदायप्रवर्त्तकस्य भाष्यकारस्य भाष्यानङ्गी-

करणे भवतामेवाचार्यविमुखत्वापत्तिर्दुर्वारेति द्वितीये भवतांप्रतिज्ञाभङ्गात् अस्माकमिष्टापत्तेश्च ।

तस्मात्सर्वेषामपि वैष्णवमन्त्राणां मोक्षहेतुत्वमेव, सकामाधिकारिणां च कामपूर्त्तये ह्युपासनात्तेषां मोक्षाभावो निर्विवादः, नारायणमन्त्रेपि तस्य तुल्यत्वादित्यलंविस्तरेण ॥ ४ ॥

यागश्चेति—

यागो नाम श्रीविष्णोरर्चावतारः श्रीशालग्रामादिः "यज्ञोवैविष्णु"रिति श्रुतेः, तदर्चननियमः पञ्चमसंस्कार इति सङ्क्षेपः, पञ्चमशब्दः अधिकसंख्याव्यावृत्त्यर्थः, एषां संस्काराणां इति यावत् चकारात् तदनुष्ठानप्रकारोपदेष्टापि बोध्यम् ।

अथ स्वस्मिन् श्रीगुरुकृतोपकारान् स्मरन्नाह—

ममोद्धर्ताभवार्णवादिति ।

यद्यपि नित्यमुक्तत्वात् प्रत्युत संसारिजनतोद्दिधीर्षयावतीर्णत्वाच्च न तत्र क्लेशादिसंसारिकधर्मयोगसंभावनाद्यवकाशशङ्कापि, तथापि लोकसंग्रहार्थं तथोक्ति र्न विरोधावहा, यथा श्रीनारदस्य भगवदवतारत्वेपि अज्ञजनान् गुरूपसत्तिप्रकारं संजिग्राहयिषया श्रीसनत्कुमारस्याग्रे स्वशोकादिसंसारधर्माणामाविष्कारः "सोहंभगवः शोचामी"त्यादिश्रुतिमुखोक्त्या, यथावा श्रीपुरुषोत्तमस्यावतारचरिते लोकवल्लीलानुकरणत्वान्निर्दोषादिविरोधस्तद्वदत्राप्यनुसन्धेयम्, एवमेव पूर्वोत्तर उक्तवक्ष्यमाणवाक्येष्वपि विवेको ज्ञेयः,अन्यथा "शङ्खावतारः पुरुषोत्तमस्येत्यादिविश्वाचार्यवाक्यविरोधो दुर्वार इति संक्षेपः ।

एवं चेत् तर्हि त्वया तत्प्रत्युपकारार्थमवश्यं प्रयतितव्यमित्याशङ्क्याह—

तेषां प्रत्युपकारार्हो न कोपि जगतीतल इति ।

तेषां श्रीमदाचार्यकृतोपकाराणां प्रत्युपकर्त्तुं योग्यः प्रत्युपकारसमर्थ इति यावत् न कोपीति, जगतीतले भूतले न जातो न जनिष्यति न वर्त्तते मनुष्यमात्र इत्यर्थः, जगतीत्युपलक्षणार्थं स्वर्गादीनां तत्रत्यैर्देवैरप्यशक्यमित्यर्थः ।

ब्रह्मविद्याप्रदानस्य देवैरपि न शक्यते ।
प्रतिप्रदानमथवा दद्याच्छक्तित आदरात् ।
इति स्मृतेः ।

यद्वा न कोपीति धरातले उपायो लोके वेदे च नास्तीति, अदृश्यत्वादित्यर्थः ॥ २६ ॥

अथ स्वदैन्यमाविष्कुर्वन् प्रार्थयते ।

कश्मलक्रोधग्रस्तोऽहम् इति ।

कश्मलक्रोधग्रस्तोऽहमविद्याग्रन्थिपीडितः
मामुद्धर जगन्नाथ चिरकालस्य दुःखिनम् ॥ २७ ॥

कश्मलक्रोधाभ्यां ग्रस्तो वशीकृतः ।

तत्र हेतुमाह—

अविद्याग्रन्थिपीडित इति!

सर्वदोषभूतानादिकर्मात्मिकाविद्याग्रन्थिना पीडितः यन्त्रितः हे जगन्नाथ चिरकालस्यानादिकालस्य दुःखिनं तं पूर्वोक्तकश्मलादिनुन्नं मामसाधारणकारुण्यादियोगेनोद्धर ।

जगन्नाथेति संबोधनं स्वोद्धरणहेतुद्योतकम् ।

यस्मात्त्वं जगदुद्धारकः ममापि जगदन्तःपातित्वाविशेषादवश्योद्धरणीयत्वमिति भावः ॥ २७ ॥

ननु अन्येपि समुद्धरणहेतव उपायाः शास्त्रेषु प्रसिद्धास्ताननुष्ठाय कृतार्थो भविष्यसीति चेत्तत्राह—

किं करोमीति ।

किंकरोमि क्वगच्छामि त्वत्तो ऽन्यन्न हि दैवतम्
सर्वे स्वार्थपरिभ्रष्टा दृश्यन्ते जगतीतले ॥ २८ ॥

न किंचिदुपायानुष्ठानं कर्तुं शक्नोस्मीति,उपायानां तदनुष्ठातॄणां च स्वातन्त्र्याभावात्, अनुष्ठानेपि अनुग्रहसहायं विना अकिंचित्करत्वाच्च, "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन शृण्वन्तोपि बहवो न विद्यु"रित्यादिना साधनानां व्यभिचारश्रवणात्

तस्मात्त्वमेव शरण्यत्वेन मया वरणीय इत्याह ।

क्वगच्छामीति ॥

तत्रहेतुमाह ।

इति ॥

स्पष्टार्थः ।

ननु अनुग्रहकर्त्तारोऽप्यनेके ब्रह्मादयः उपास्यत्वेन प्रसिद्धास्तदाश्रितो भूत्वा कृतकृत्यो भव किं मच्छरणेनेत्याशङ्क्याह ।

सर्वे स्वार्थपरिभ्रष्टा दृश्यन्ते जगतीतले ।

इति ।

सर्वेऽपि ब्रह्मरुद्रेन्द्रादयो देवाः जगतीतले लोकत्रयेऽपि स्वार्थपरिभ्रष्टाः स्वार्थो भगवत्स्वरूपादिविषयकानुभूतिविशेषः स्मृतिसंतानरूपो वा तस्मात्परिभ्रष्टास्तद्रहिता इत्यर्थः दृश्यन्ते इत्यत्र शास्त्रेष्विति योजनीये, तथाच ।

प्रजापतिं च रुद्रं चाप्यहमेव सृजामि वै ।
तौ हि मां न विजानीतो मम मायाविमोहितौ ॥

इत्यादिवाक्यात् ।

ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा ॥
विष्णुमायामहावर्त्तमोहान्धतमसा वृताः ।
आराध्यं त्वामभीप्सन्ते कामानात्मविशुद्धये ॥

इति वैष्णवे अदितिवचनं च ।

ते परजन्यत्वात् परोपशिक्षितत्वात् परदत्तपरिच्छिन्नैश्वर्यवत्वात् कर्मतन्त्रत्वाच्च नाश्रयणीया इति यावत्, स्वस्य त्राणएवाशक्ताः परत्रातृत्वस्य तु का वार्त्तेति भावः, अस्य विस्तरस्तु "नान्या गतिः कृष्णपदारविन्दा"दित्यस्य विवरणे श्रीपुरुषोत्तमाचार्यचरणैर्विशदीकृतत्वादत्रोपरम्यते "अथ ये ऽन्यथा ऽतो विदुरन्ये राजानस्तेक्षय्यलोका भवन्ती"ति श्रुतेः, व्याख्याताचेयं श्रीपुरुषोत्तमाचार्यपादैः, भूमोपासनस्य सार्वज्ञाद्यनवच्छिन्नफलं निरूप्य,

अथोक्तोपासनदार्ढ्यार्थं परिच्छिन्नोपास्यविषयकपरिच्छिन्नफलकान्यदेवाद्युपासनपरान् मूढान्निन्दति भगवतीश्रुतिः ।

अथेति पक्षान्तरे, अत उपदिष्टसिद्धान्ताद्विपर्ययं देवान्तरमुपास्यत्वेन निश्चितवन्तः कथमिव जानन्तीत्यपेक्षायां ज्ञानस्यानुकरणमाह—

अन्येराजान इति ।

अन्ये ब्रह्मरुद्रादयोऽपि राजानः उपासिताः सन्तो मोक्षदातारः स्वतन्त्रा मोक्षार्थिनोपासनीया इति ते क्षय्यलोका भवन्ति स्वर्गपशुपुत्रादयो जन्मादिलक्षणहेतवो लोकाः फलानि भवन्ति ।

अन्तवत्तु फलं तेषांतद्भवत्यल्पमेधसाम् ।
आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ॥
इति भगवदुक्तेः ।

किञ्च तेषां क्षेत्रज्ञत्वाविशेषेण मोक्षदातृत्वाऽपरिच्छिन्नैश्वर्यादियोगाभावात् मोक्षदानानर्हत्वं शिवेनैवोक्तं स्वानुभूतं चाह घण्टाकर्णोहरिवंशे ।

अहंकैलाशनिलयमासाद्य वृषभध्वजम् ।
आराध्य तं महादेवमस्तुवं सततं शिवम् ॥
ततः प्रसन्नो मामाह वृणीष्वेति वरं हरः ।
ततो मुक्तिर्मया तत्र प्रार्थिता देवसन्निधौ ॥
मुक्तिम्प्रार्थयमानं मा पुनराह त्रिलोचनः ।
मुक्तिप्रदाता सर्वेषां विष्णुरेव न संशयः ॥
तस्माद्गत्वा वदरीं तत्राराध्य जनार्दनम् ।
मुक्तिं प्राप्नुहि गोविन्दान्नरनारायणाश्रमे ॥
इत्यादिना ।
भारते कर्मपारतन्त्र्यमपि स्फुटमेव ॥
युगकोटिसहस्राणि विष्णुमाराध्य पद्मभूः ।
पुनस्त्रैलोक्यधातृत्वं प्राप्तवानिति शुश्रुमः ॥
इति ।
महादेवः सर्वयज्ञे महात्मा ॥
हुत्वात्मानं देवदेवो बभूव ।
विश्वां ल्लोकान् व्याप्यविष्टभ्यकीर्त्या ।
विराजते द्युतिमान् कृत्तिवासाः ।
इति ।
कालपरिच्छेदोपि श्रूयते ।
एको ह वै नारायण आसीन्नब्रह्मानेशान इत्यादि ।

किञ्च "योन्यांदेवतामुपास्ते अन्यो ऽसावन्योऽहमस्मिन् स वेद यथा पशु"रित्यादिना तदुपासकानां पशुत्वश्रवणाच्च, यद्वा

स्वार्थपरिभ्रष्टत्वं नाम स्वार्थपरत्वेन परेषां धर्महानिकर्तृत्वं तत्र सकामानां स्वर्गादिसाधनतपोयोगादिभ्रंशकत्वं कन्दुविश्वामित्रादिचरिते प्रसिद्धं, निष्कामानां साधनभ्रंशे तु तेषां सामर्थ्यमेव नास्तीतिविवेकः, "तस्य ह न देवा नाभूत्या ईशत" इति श्रुतेः, हनेत्यव्ययपदम् अप्यर्थे, देवा ब्रह्मरुद्रादयोऽप्यस्य निष्कामानन्यभक्तस्य विदुषः अभूत्यै पराभवाय न ईशते समर्था न भवन्तीत्यर्थः, तथापि विघ्नाचरणं तेषां स्वभाव एव परश्रेयोऽसहिष्णुत्वात् "यदेतद्ब्रह्म मनुष्या विदुस्तदेषां देवानामप्रिय"मितिश्रुतेः ॥ २८ ॥

किञ्च अनन्यशरणत्रातेति ।

अनन्यशरणत्राता रक्षकः शरसंमतः ॥
निरयक्लेशसन्त्रस्त आगतोऽस्मि तवान्तिके ॥ २९ ॥

नान्यः शरणमुपायादिश्रेयोहेतुर्येषां ते ऽनन्यशरणाः स्वपादमूलैकसाधनकास्तेषां त्राता रक्षकः सर्वेषां भक्तानामितिशेषः ।

किञ्चशरसम्मत इति ॥

श्वासात्मना शरति ब्रह्मणो निःशरतीति शरो वेदः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद" इति श्रुतेः, तस्य सम्मतस्तत्तुल्यः यथा मात्रादेरपि वत्सलतरो वेदो जीवानां पुरुषार्थबोधनेन तद्रक्षकस्तद्वत्, यद्वा शरति निश्शरत्यस्माद्विश्वमिति शरः श्रीभगवान् पुरुषोत्तमस्तत्सम्मतस्तत्तुल्यः तदनुकूलो वेति, तत्र त्राता रक्षक इत्यनयोः सामान्यविषयपरत्वेन पुनरुक्तिर्निरसनीया, तत्र त्रातृत्वं बुद्ध्यादीनां कामादिविषयेभ्यो विमुखीकर्तृत्वं, रक्षकत्वं च बहिःकरणानां शब्दादिभ्यो रक्षणमिति विवेकः,

उक्तलक्षणस्य त्रातुस्तव अन्तिके च चरणयोः छायायामागतोऽस्मि प्राप्तोऽस्मि कुत इत्यपेक्षायां हेतुमाह —

निरयक्लेशसंत्रस्त इति ।

निरये रौरवादौ ये क्लेशा यमकिङ्करयातनोद्भवास्तेभ्यो ऽति-

शयेन त्रासमापन्नः, उपलक्षणंचैतत् जन्ममरणादिलक्षणसंसारचक्रस्य, संसारचक्रभ्रमणाच्च संत्रस्त इति ॥ २९ ॥

वेदनां गर्भसम्बन्धं नाऽश्नामि त्वदनुग्रहात् ॥
तथा साधय मां देव पाहिपाहि कृपानिधे ॥ ३० ॥

हे देव त्वदनुग्रहात् तव कारुण्यादिगुणयोगजन्मप्रसादतः गर्भसंबन्धं जन्मादिजन्यदुःखं वेदनां मरणाद्यवस्थाजन्यं च दुःखं यथा नाश्नामि नानुभवामि तथा मां पाहि पाहि संसारादिति शेषः, अत्यादरे वीप्सा,

कथंरक्षणीयइत्यपेक्षायां तत्प्रकारं प्रार्थयते ।

तथा मां साधयेति ॥

शिक्षयेत्यर्थः ।

रक्षणेहेतुमाह—

कृपानिधे इति ।

स्वाभाविकयावदात्मवृत्तिपरिपूर्णकृपादिसद्गुणानां निधिरनपायिनिवासस्थानं, निधीयतेऽस्मिन्निति निधिरित्यधिकरणव्युत्पत्तिर्बोध्या, तस्य सम्बोधनमेतत्, ननु कृपादिगुणयोगे सत्यपि सामर्थ्याभावे कथं रक्षामीति चेत्तत्रोक्तम्—

देवेति ।

सर्वज्ञाद्यखिलसामर्थ्यसम्पन्नस्त्वमसीति भावद्योतनार्थमिदं द्वितीयं सम्बोधनम् ॥ ३० ॥

ननु "ऋतेज्ञानान्नमुक्तिः" "तमेवविदित्वातिमृत्युमेती"त्यन्वयव्यतिरेकश्रुतेः, यद्वा "भक्तिरेवैनं दर्शयती"त्यादिश्रुतेः, परया भक्त्यैव श्रेयः प्राप्तिरिति, ते च ज्ञानभक्ती बुद्धिशुद्धिसापेक्षे, बुद्धिशुद्धिश्च स्ववर्णाश्रमोचितधर्मानुष्ठानेन, धर्मानुष्ठानं शास्त्रोक्तविध्यपेक्षितमिति वैदिकानां प्रक्रिया, तथा च विधिनिर्णीतस्ववर्णाद्यनुकूलधर्मानुष्ठानेनान्तःशुद्धिं सम्पाद्य ज्ञानभक्त्येकतरेण मुक्तः स्याः किं मच्छरणेनेति चेत्तत्राह—

विध्यविधी न जानामीति ।

विध्यविधी न जानामि न जानामि त्वदर्चनम् ॥
स्वीयानुग्रहभावेन मनःकामं प्रपूरय ॥ ३१ ॥

अयं विधिस्तेनायं धर्मो विधेयः अयमविधिर्निषेधस्तेनायमधर्मो निषिद्ध इत्येतदहं न जानामि तथाभूतं ज्ञानं नास्तीत्यर्थः, यदि तद्विषयकज्ञानमेव नास्ति, तर्हि तदनुष्ठानस्य का वार्त्तेति भावः, ननु कर्मणो दुर्ज्ञेयत्वात् "गहना कर्मणो गति"रिति भगवद्वचनात्, तथापि अर्चनादेः सौकर्यात्तदेवानुष्ठेयं, तस्यापि श्रेयोमूलत्वादिति चेत्तत्राह,

नजानामि ।

त्वदर्चनविषयकज्ञानस्यैवाभावस्तदनुष्ठानस्य तु को वा प्रसङ्ग इत्यर्थः, ननु साधनाभावे कथमिव फलसिद्धिरित्याशङ्क्याह—

स्वीयानुग्रहभावेन मनःकामं प्रपूरयेति ।

स्वीयश्चासावनुग्रहश्च स्वीयेष्वनन्यभक्तेषु वाऽनुग्रहस्तस्य भावो विषयता तेन स्वीयानुग्रहविषयीकरणेनेति यावत्, मनःकामं काम्यते मुमुक्षुभिरिति कामः श्रीभगवद्भावापत्तिलक्षणो मोक्षः मनःकामशब्दाभिधेयस्तं सर्वेषां साधनानां तवानुग्रहकिंकरत्वात् तेनैव सर्वसिद्धिः सुलभेति तात्पर्यार्थः, "यमेवैष वृणुते तेन लभ्यः" "तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मन" इत्यादिश्रुतेः, ननु साधनान्तराभावे ऽनुग्रहमात्रेण सिद्ध्यङ्गीकारे नैर्घृण्यादिदोषप्रसङ्गात्साधनविषयकशास्त्रव्याकोपाच्चेति चेत्सत्यं, त्वदनुग्रहयोगात् तत्क्षणमेव सर्वसाधनसम्पत्तेः सम्भवात् उभयोरपि साधनसाध्ययोस्त्वदनुग्रहप्रयुक्तत्वादिति ब्रूमः, यथा स्तनन्धयबालस्य रोगापत्तौ औषधभक्षणानर्हत्वेन तन्मात्रौषधभक्षणादेवौषधभक्षणरोगनाशौ तत् स्तनपानेनैव भवतः, तथा सर्वसाधनानुष्ठानानर्हस्यापि मम त्वदनुग्रहेणैव साधनसाध्ययोः सिद्धिः सम्भवत्येवेति भावः ३१ ॥

सर्वसाधनहीनत्वं दर्शयन् प्रार्थयतेद्वाभ्यां—

नियताचारहीनोहमिति ।

नियताचारहीनोऽहं कामुको लोभलम्पटः ॥
नियमानन्ददासोऽयमित्याकर्ण्य गिरां प्रभो ॥ ३२ ॥
यथा न लज्जसे धीमन् तथा सम्पादय क्रमात् ॥
तवावतारो भूतानां लोकद्वयविधायकः ॥ ३३ ॥

"अहरहः संध्यामुपासीत" "यावज्जीवमग्निहोत्रं जुहोती" इत्यादिविधिना विहितो धर्मो नियताचारस्तेन हीनो ऽस्मि ।

नियतस्य तु सन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ।
सन्ध्याहीनो ऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
इत्यादिनिषेधस्य विषयोऽस्मीतिभावः ।
अत एव कामुको लोभलम्पटइति ।

शुद्धिहेतुभूतधर्मयोगाभावात् प्रत्युत तत्प्रतिभटकामलोभादियोगात् सर्वपापिष्ठाधिराजो नरकनिष्ठार्होऽस्मीति भावः, ।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।
इतिभगवदुक्तेः ।
ननु यद्येवंभूतोऽसि तर्हि—
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

इत्यादिशास्त्रात्स्वकृतं त्वया ऽवश्यं भोक्तव्यमेव कथं मया ऽनुग्रहणीय इत्याशङ्क्य स्वस्य लज्जानिवारणार्थमित्याह ।

नियमानन्ददासोऽयमिति ।

अयममुको नियमानन्दस्य सर्वज्ञसर्वशक्तिविष्णुरूपस्य दासो भूत्वा कामादिदोषग्रस्तत्वान्नरकं प्राप्स्यते इति या लोकानां गिरा

राज्ञि चामात्यदोषाः स्युः पत्नीदोषाश्च भर्त्तरि ।
तथा शिष्यार्जितं पापं गुरुं प्राप्नोति निश्चितम् ।

इति शास्त्रीया च या गिरा तामाकर्ण्य श्रुत्वा त्वं यथा न लज्जसे लज्जां न गच्छसि तथा मां क्रमात्सम्पादय, आ-

क्तिदानादिभिः पूरणीयोऽहं भवता, हे प्रभो हे धीमन् इति सम्बोधनाभ्यां सर्वसामर्थ्यसार्वज्ञादिपराभ्यां समर्थानां सर्वज्ञानां स्वाकीर्त्तिगिराश्रवणमतिदुःसहमिति सूचयति, अस्माकं तु न दोषावहं निरयप्राप्तिश्रवणवत् दुःखहेतुत्वं नास्ति नुकूल्यसङ्कल्पादिषडङ्गान् सम्पा(१)दयित्वा स्वात्मसात्कृत्वा परभपरं तु भवतोऽकीर्त्तिश्रवणमस्माकमपि दुःसहमेव, अतो ममानङ्गीकारे उभयत्राऽनिष्टतमो दोषयोगः, अङ्गीकारे च उभयत इष्टयोगः इतिविचार्य स्वकीर्त्तिलाभाय चाहमवश्यमनुग्रहणीय इतिभावः, यद्वा ननु स्यादेतद्यदि तथाभूताधमोद्धरणे मम शक्तिः स्यान्न तु साऽस्ति तस्मादकीर्त्तिश्रवणोद्भवं दुःखं मयाऽवश्यं सोढव्यमित्याशङ्कामुक्ताभ्यां सम्बोधनाभ्यां निराकरोति हे प्रभो सर्वसामर्थ्याश्रय हेधीमन् सर्वज्ञानाश्रय तव किञ्चिदप्यशक्यं नास्तीतिभावः।

ननु सर्वशक्त्यादियोगेपि किमिति आत्मसात्करणीयोऽसि हेत्वभावादित्याशङ्क्याह ।

तवाऽवतारो भूतानां लोकद्वयविधायक इति ।

लोकद्वयविधानं चात्र निःश्रेयोभिकाङ्क्षिणां साधनसाध्यरूपयोगक्षेमवहनमेव बोध्यम् ॥ ३२ ॥ ३३ ॥

एवं प्रार्थितेन श्रीमदाचार्येणा ऽऽत्मसात्कृतमात्मानमाकलय्य स्वभाग्यमभिनन्दन्नाह—

धन्योस्मीत्यादिना ।

धन्यो ऽस्म्यनुगृहीतोऽस्मि विष्णुना प्रभविष्णुना ॥
यच्छिरसि स्थितं नाम नियमानन्द इत्यपि ॥ ३४ ॥

अहं धन्योऽस्मि सफलजन्माऽस्मि कृतकृत्य इति यावत् कृत्यशेषाभावात् किमत्रकारणमित्याशङ्क्याह ।

विष्णुना ऽनुगृहीतोस्मीति ।

विष्णवनुग्रह एव कृतार्थत्वे हेतुरिति भावः ।

अथ विष्णोर्विशेषणम्—

प्रभविष्णुनेति ।

प्रभवनशीलेनेति "बहुस्यां प्रजायेय"इति श्रुतेः. यदि विष्णोरनु-

(१) सम्पादयित्वेतिपाठः प्रमादिकः, सम्पाद्यइति तु भवितुं युक्तम् ।

गृहीतो न स्यां तर्हि एतादृशदुर्लभस्य लाभो मम मन्दभाग्यस्य दुष्प्राप्यः स्यादित्यर्थः, ।

तदनुग्रहस्यैव को वा ज्ञापक इत्यपेक्षायामाह—

यच्छिरसि स्थितं नाम नियमानन्द इत्यपीति ।

यस्य पूर्वोक्तदोषाद्यसाधारणाश्रयस्यापि मम शिरसि नियमानन्द इति नाम स्थितमस्ति नियमानन्द दास इति लौकिक्यामपि वाण्यां नियमानन्द इति शब्दस्य नित्यसंबन्धो ज्ञात, एष नित्यसंबन्धः श्रीभगवदनुग्रहं विना दुर्लभ इत्यर्थः, यदि नाम संबन्धमात्रेणापि कृतार्थोऽस्मीति तर्हि पूर्णानुग्रहेण कृतार्थः स्यामिति किं वक्तव्यमिति कैमुत्यन्यायसूचको ऽत्रापीति शब्दः, यथा लोके राज्ञो नामाङ्कितपत्रधारिणमपि पुमांसं लोका बहु मन्यन्ते किं पुनः साक्षात्संबन्धेन तद्वत् प्रकृतेरपीति भावः ॥ ३४ ॥

अथ हर्षभरेण पुनस्तद्गुणान्वर्णयन् स्तौति ।

देवनद्यां समाश्लिष्ट इति ।

देवनद्यां समाश्लिष्टः शोभी सर्वाङ्गसुन्दरः ॥
निःस्पृहो निर्ममः शान्तः पूर्वाचारसमन्वितः ॥ ३५ ॥

देवनदी गोदावर्याख्या गङ्गा तस्यां सम्यक् स्नातः ।

किंच शोभीति ।

शोभास्यास्तीति शोभी,

तदेव दर्शयति

सर्वाङ्गसुन्दरः,

अङ्गप्रत्यङ्गनिरतिशयसौन्दर्याश्रयः, लावण्यमाधुर्यादीनामप्युपलक्षणमेतत् ।

एवं रूपाश्रितगुणानुक्त्वा स्वरूपगुणानाह—

निःस्पृह इति ।

स्वभावतो निर्गता स्पृहा यस्मात्सः आत्मरतित्वेनाप्तकामत्वाच्च "आत्मरतिरात्मक्रीड" इत्यादिश्रुतेः,

किञ्च निर्मम इति ।

ममकारास्पदस्य भगवदात्मकत्वेन तदीयत्वनिश्चयात् , ।

द्व्यक्षरं तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्यु र्न ममेति चशाश्वतम् ।

इतिसूत्रकारोक्तेः ।

किञ्चशान्त इति ।

संयताचित्तमनाः नित्यमुक्तत्वेन क्षोभादिहेतुप्रकृतिसम्बन्धास्पृष्टमाहात्म्यात् ।

किञ्च पूर्वाचारसमन्वित इति ।

पूर्वेषां श्रीसनत्कुमारनारदादीनामाचारः श्रीपञ्चरात्रनिरूपितभागवतधर्मस्तेन समन्वितः, तदनुष्ठानतत्परः लोकसंग्रहार्थमिति शेषः, तदर्थमेवावतारत्वात् , ॥ ३५ ॥

किञ्चगम्भीरमतिः ।

गम्भीरमतिर्गोस्वामी स्वाश्रयाणां सुखावहः ॥
द्वन्द्वातीतस्वभावश्च कार्पण्यहरणोत्सुकः ॥ ३६ ॥

गम्भीरा इयत्तावच्छेदेनाकलयितुमशक्या कुतर्कैर्मतिर्यस्य सः अक्षतज्ञानत्वात् ।

किञ्चगोस्वामीति ।

गवामिन्द्रियाणां स्वामी स्ववशकर्तृत्वात् , यद्वा गवां श्रुतीनां स्वामी तदुक्तार्थप्रवर्त्तकत्वात् गोः पृथिव्या वा स्वामी तद्भारभूताधर्मिनाशकत्वेन तद्रक्षकत्वात् ।

किञ्च स्वाश्रयाणां सुखावहइति ।

स्वमेव भगवांच्छ्रीमदाचार्य आश्रय उपायोपेयसम्बन्धादिरूपो येषां ते स्वाश्रया अस्मदादयः तेषां सुखं परमनिःश्रेयोलक्षणमावहति प्रापयतीति तथा ।

किञ्च द्वन्द्वातीतस्वभावश्चेति ।

द्वन्द्वानि शीतोष्णसुखदुःखानि तान्यतिक्रम्य स्थितः स्वभावो यस्य सः ।

किञ्चकार्पण्यहरणोत्सुक इति ।

स्वाश्रितानां कार्पण्यम् अनात्मज्ञत्वं "यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति स कृपण" इति श्रुतेः, तस्य हरणे नाशने उत्सुकः सदोद्युक्तः ॥ ३६ ॥

किञ्च वेदाध्ययनविख्यात इति—

वेदाध्ययनविख्यातः परमार्थपरायणः ।
श्रीकृष्णप्रियदासश्च श्रीकृष्णे कृतमानसः ॥ ३७ ॥

वेदाध्ययनं जगति विख्यातं येन सः ।

परमार्थपरायणः ।

"परमार्थस्त्वमेव"इतिस्मृतेः परमार्थः परमपुरुषरूपः सर्वज्ञो जगज्जन्मादिहेतुर्मुक्तोपसृप्यो मुमुक्षुध्येयो ब्रह्मरुद्रेन्द्रादिवन्दितपादपीठः शास्त्रयोनिर्मुकुन्दो भगवांच्छ्रीकृष्णः स्वतन्त्रसत्ताश्रय एवोत्कृष्टमयनं निवासस्थानं यस्य सः सदैव तत्करस्थत्वात्, यद्वा अयनं आश्रयो निष्ठास्पदं यस्य सः यद्वा परायणं प्राप्यं यस्य सः ।

तत्र हेतुमाह ।

श्रीकृष्णप्रियदास इति ।

दासेषु प्रियदासः श्रीकृष्णस्य प्रियदासस्तथोक्तः, यद्वा प्रियश्चासौ दासश्चेति तथोक्तः प्रेष्ठप्रेष्ठतमत्वयोरप्युपलक्षणं सर्वसम्बन्धाश्रयत्वात्,

अत एव श्रीकृष्णेकृतमानस इति ।

श्रीकृष्णे कृतं स्थापितं मानसं मनो येन सः एतेन तदनुयायिभिरपि मनः श्रीकृष्ण एव योजनीयमिति सूचितम् ॥ ३७ ॥

किञ्च वैष्णवैः श्लाघनीय इति ।

वैष्णवैः श्लाघनीयश्च वैष्णवानां प्रियङ्करः ॥
वैष्णवप्रियसर्वार्थो वैष्णवैकपरायणः ॥ ३८ ॥

वैष्णवैर्विष्णुदेवताकैस्तदनन्याश्रितैः साधुभिः साम्प्रदायिकैः स्तवनार्चनादिविषयीकर्त्तुं योग्य इत्यर्थः, ।

तत्र हेतुमाह ।

वैष्णवानां प्रियंकर इति ।

स्वप्रियकर्त्ता ऽवश्यमेव पूज्य इत्यर्थः ।

किञ्च वैष्णवप्रियसर्वार्थ इति ।

वैष्णवानां प्रियाः प्रेमविषयाः सर्वेऽप्यर्था आचारविशेषा यस्य सः, यद्वा सर्वश्चासावर्थः पुरुषार्थश्च सर्वार्थः वैष्णवानां प्रियश्चासौ सर्वार्थश्चेति विग्रहः, ।

तत्रहेतुः,

वैष्णवैकपरायण इति ।

वैष्णव एव एकं मुख्यं परमुत्कृष्टमयनं निष्ठाविषयो यस्य सः वैष्णवशब्दो ऽत्र विष्णोराराधनाख्यो धर्मो विवक्षितः, तस्यैव वैष्णवानां मुख्योत्कृष्टनिष्ठाविषयत्वात्, यद्वा विष्णोर्भावो वैष्णवस्तद्भावापत्तिलक्षणो मोक्षो विवक्षितः, मुक्तगम्यत्वात्, यद्वा विष्णोरिदं वैष्णवं वैकुण्ठाख्यं मुक्तप्राप्यं परमं धाम तदेव मुख्यमुत्कृष्टं निवासस्थानं यस्येतिविग्रहः, यद्वा वैष्णवानामेकं प्रधानं परं केवलमाश्रयत्वादयनं शरणं यस्य स तथोक्तः ॥ ३८ ॥

किञ्च वैष्णवोद्वेगहारीचेति—

वैष्णवोद्वेगहारी च सदा वैष्णवदुःखहा ॥
शोभाढ्यो वैष्णवाकीर्णः शोभते उडुराडिव ॥३९॥

वैष्णवानामुद्वेगः संशयविपर्ययमूलभूतो बुद्धिदोषस्तं हरणशीलः यद्वा उद्वेगः कदा प्राप्स्यामः कदा चक्षुषा साक्षात् पश्याम इत्यादिस्वरूपकः, यद्वा संसारचक्रभ्रमणासाधारणहेतुरात्मविषयकलक्षणो ऽविवेक उद्वेगशब्दाभिधेयस्तं हरणशीलः, यद्वा

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।

इत्यादिश्रीमुखोक्तेः, परेभ्य उद्विजनं परोद्वेजनं वा उद्वेगः स्वभावविशेषस्तं हरणशीलः, चकारात् उद्वेगादिकारणानादिदैवीमायासम्बन्धनिवारकोऽपीति ज्ञेयम्, अत एव

सदावैष्णवदुःखहेति ।

वैष्णवानां दुःखं हन्तीति तथा सः, दुःखं मोक्षप्रतिबन्धकमनादिकर्मरूपं बोध्यम्, सर्वदुःखमूलत्वात्, ।

किञ्च शोभाढ्य इति ।

प्रपन्नरक्षणरूपस्वाराज्यश्रियाभिषिक्तः श्रीभगवदनवच्छिन्नानुभूतिलक्षणशोभासम्पन्नो वा वैष्णवाकीर्णः शोभतइति, वैष्णवैः स्वाश्रितैः साम्प्रदायिकैरावृतः विराजते इति,

अत्र दृष्टान्तमाह ।

उडुराडिवेति ।

तारागणैरावृतो निशाकरो यथा शोभते तद्वत् ॥ ३९ ॥

अथात्मदैन्यकथनपूर्वकं तस्य महिम्नो ऽपरिच्छिन्नत्वेन दुर्ज्ञे-यत्वं व्यञ्जयन्स्तौति ।

बालइत्यादिना ।

बालो लाल्यस्त्वया स्वामिन् देशकालविमोहितः ॥
न जानामि न जानामि कीदृशो महिमा तव ॥४०॥

हे स्वामिन् अहं त्वया लाल्यः अनुकम्पनीयः कीदृशोऽहं बाल स्तत्रापि देशकालविमोहितइति ।

देशकालादिविषयकमोहाश्रयः देशकालादिविवेकशून्यत्वादे-वानुकम्प्य इत्यर्थः,

यदि देशकालादीनामेव ज्ञानं नास्ति तर्हि त्वन्महिमविषयक-ज्ञानाभाव इति का वार्त्तेति कैमुत्यं सूचयन्नाह ।

न जानामीति ।

कीदृशो महिमा तवेति कीदृशः किम्प्रकारकः केनोपमानीकर्त्तु-महं कियान् वा परिमाणत इति को वा स्वरूपत इति न जानामि अज्ञानोत्कर्षद्योतनाय वीप्सा ॥ ४० ॥

अथात्माभिप्रेतं विज्ञापयन् ग्रन्थमुपसंहरति—

लघुस्तवेनेति ।

लघुस्तवेन भो नाथ भो आचार्यशिरोमणे ॥
दासोऽयमिति मां ज्ञात्वा भक्तिं देहि पदाम्बुजे ॥४१॥

इति श्रीवैष्णवाचार्यश्रीनिवासाचार्यविरचितं ॥
लघुस्तवराजस्तोत्रं सम्पूर्णम् ॥

लघुनि मिताक्षरपदानि यत्र स लघुः सचासौ स्तवस्तेन स्तु-तिव्याजमात्रेणेति भावः, यद्यपि बालबुद्धित्वात् मम महिमवर्णन-ज्ञानानधिकरणं तथाप्ययं मम दासः दासत्वेन जगति विख्यात-स्तस्मान्मया ऽऽत्मसात्करणीय इति मां ज्ञात्वा स्वपदाम्बुजे भक्तिं देहीति वाक्यार्थः ।

तत्रानुग्रहविशेषे त्वरां प्रार्थयन्संबोधयति ॥

भोनाथइति ।

"नाथृयाच्ञोपतापैश्वर्याशीःषु"ज्ञानभक्त्यादियाच्ञापादानभूतः परिपूर्णैश्वर्यो वा नाथपदार्थो विवक्षितः, तत्र प्रथमव्याख्यानेन ज्ञानभक्त्यादेः प्रार्थना द्वितीयेन तद्दानयोग्यरूपसामर्थ्याविष्कार इति विवेकः,

ननु स्यादेतत् भक्त्यादीनां दातृत्वं तद्दानादिशक्त्याश्रयत्वयोगश्च यदि कश्चिदन्यो मत्समोऽभ्यधिको वा आचार्यान्तरो न स्यान्नत्वेतदस्तीत्याशङ्क्य सम्बोधनान्तरमाह—

भो आचार्यशिरोमणे इति ।

आचार्येषु मुख्यस्त्वमेव सम्प्रदायप्रवृत्त्यर्थावतीर्णत्वात् अन्येषां तु तव मतैकैकदेशानुयायित्वादिति आचार्यशिरोमणित्वप्रयोगाभिप्रायः, ॥ ४१ ॥

श्रीश्रीनिवासगिरिजा ह्याद्याचार्याधिगामिनी ।
श्रेयस्तनोतु साधूनां गुरुभक्तिसरिद्वरा ॥ १ ॥
श्रीगुर्वनुग्रहो ध्येयः संसाराब्धेश्च कुम्भजः ।
अज्ञानतमसो भानुर्मुक्तिदाने हरिर्यथा ॥ २ ॥
वन्दे श्रीनियमानन्दं नियमेन निजाश्रितान् ।
आनन्दयन्तमाचार्यं चक्ररूपिणमीश्वरम् ॥ ३ ॥
वैकुण्ठाब्धिसमुद्भूतः श्रीनिवासार्यचन्द्रमाः ।
मताम्बुद्धौ जयत्यद्धा कर्मतापतमोपहः ॥ ४ ॥

हरिः ॐतत सदिति श्रीहयग्रीवानुग्रहजीवनेनस्वभूदेवपदानन्याश्रितेनपुरुषोत्तमप्रसादाख्येन वैष्णवेन विरचिता गुरुभक्तिमन्दाकिनी समाप्ता ।

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षमराजविरचितवृत्तिसमेता (वेदान्तः) २

(१६) मीमांसाबालप्रकाशः जैमिनीयद्वादशाऽध्यायार्थसंग्रहः श्रीभट्टनारायणात्मजभट्टशङ्करविरचितः । (मीमांसा) २

(१७) प्रकरणपञ्चिका प्रभाकरमतानुसारि—मीमांसादर्शनम् । महामहोपाध्यायश्रीशालिकनाथमिश्रविरचितम् श्रीशङ्करभट्टकृता मीमांसासारसंग्रहश्च सम्पूर्णः (मीमांसा) ३

(१८) अद्वैतसिद्धिसिद्धान्तसारः । पण्डितप्रवरश्रीसदानन्दव्यासप्रणीतस्तत्कृतव्याख्यासमलङ्कृतः । (वेदान्तः) ३

(१९) कात्यायनश्रौतसूत्रम् । महामहोपाध्यायश्रीकर्काचार्यविरचितभाष्यसहितम् । १२

(२०) ब्रह्मसूत्रभाष्यम् । श्रीभास्कराचार्यविरचितं सम्पूर्णम् (वेदान्तः) ३

(२१) श्रीहर्षप्रणीतं खण्डनखण्डखाद्यम् । आनन्दपूर्णविरचितया खण्डनफक्किकाविभजनाख्यया व्याख्यया विद्यासागरीतिप्रसिद्धया समेतम् । (वेदान्तः) १४

(२२) आख्यातचन्द्रिका श्रीभट्टमल्लविरचिता १

(२३) श्रीलक्ष्मीसहस्रम्—बालबोधिनीव्याख्ययाऽवतरणिकया च सहितम् ८

(२४) ब्रह्मसूत्रवृत्तिः मरीचिका श्रीव्रजनाथभट्टकृता (वेदान्तः) ... २

(२५) क्रोडपत्रसंग्रहः । अत्र श्रीकालीशङ्करसिद्धान्तवागीशविरचितानि अनुमानजागदीश्याः प्रत्यक्षानुमानगादाधर्योः प्रत्यक्षानुमानमाथुर्या व्युत्पत्तिवादस्य शक्तिवादस्य मुक्तिवादस्य शब्दशक्तिप्रकाशिकायाः कुसुमाञ्जलेश्च क्रोडपत्राणि ... ३

(२६) ब्रह्मसूत्रम्, द्वैताद्वैतदर्शनम् । श्रीसुन्दरभट्टरचितसिद्धान्तसेतुकाऽभिधटीकासहितश्रीदेवाचार्यप्रणीतसिद्धान्तजाह्नवीयुतम् २

(२७) षड्दर्शनसमुच्चयः । बौद्धनैयायिककापिलजैनवैशेषिकजैमिनीयदर्शनसंक्षेपः । मणिभद्रकृतटीकया सहितः । हारिभद्रसूरिकृतः । १

(२८) शुद्धाद्वैतमार्तण्डः प्रकाशव्याख्यासहितः । प्रमेयरत्नार्णवश्च १

(२९) अनुमानचिन्तामणिव्याख्यायाः शिरोमणिकृतदीधित्या जागदीशी टीका । १३

(३०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः परिभाषा—संस्कारप्रकाशात्मकः । सपिण्डदीपकश्च ११

(३१) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः आह्निकप्रकाशः ६

(३२) स्मृतिसारोद्धारः विद्वद्वरविश्वम्भरत्रिपाठिसंकलितः ४

(३३) वेदान्तरत्नमञ्जूषा । श्रीभगवत्पुरुषोत्तमाचार्यकृता । २

(३४) प्रस्थानरत्नाकरः । गोस्वामिश्रीपुरुषोत्तमजीमहाराजविरचितः ... २

(३५) वेदान्तपारिजातसौरभं नाम ब्रह्ममीमांसाभाष्यं श्रीनिम्बार्काचार्यविरचितम् । १

(३६) योगदर्शनम् । परमहंसपरिव्राजकाचार्यनारायणतीर्थविरचित-योगसिद्धान्तचन्द्रिकासमाख्यया व्याख्यया संवलितम् । २

(३७) वेदान्तदर्शनम् । परमहंसपरिव्राजकाचार्यश्रीरामानन्दसरस्वतीस्वामिकृत ब्रह्मामृतवर्षिणीसमाख्यव्याख्यासंवलितम् । ४

(३८) विश्वप्रकाशः । कोशः । विद्वद्वरश्रीमहेश्वरसूरिविरचितः । २

(३९) श्रीसुबोधिनी । श्रीवल्लभाचार्यविनिर्मिता श्रीमद्भागवतव्याख्या गोस्वामीश्रीविठ्ठलनाथदीक्षितविरचितटिप्पणीसहिता । श्रीमद्भागवतदशमस्कन्धजन्मप्रकर्ण श्रीसुबोधिनीटिप्पण्योः-प्रकाशः गोस्वामि श्रीश्री पुरुषोत्तमजीमहाराज विरचित ३

(४०) वीरमित्रोदयः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः पूजाप्रकाशः । ४

(४१) वेदान्तसिद्धान्तसंग्रहः । श्रुतिसिद्धान्तापरनामकः । श्रीब्रह्मचारिवनमालिमिश्रविरचितः । वेदान्तकारिकावली श्रीपुरुषोत्तमप्रसाद शर्म्मकृता अध्यात्मसुधातरङ्गिण्याख्यटीकया सहिता ३

(४२) स्वानुभवादर्शः । श्रीमत्परमहंसपरिव्राजकाचार्यनारायणाश्रमशिष्यमाधवाश्रमविरचितः । स्वकृतटीकाविभूषितश्च । १

(४३) याज्ञवल्क्यस्मृतिः । बालम्भट्टीसमाख्य व्याख्यासमलङ्कृतमिताक्षरासहिता । व्यवहाराध्यायः ११

(४४) गादाधरी । श्रीगदाधरभट्टाचार्यचक्रवर्तिकृता । श्रीगङ्गेशोपाध्यायविरचिततत्त्वचिन्तामण्या श्रीरघुनाथतार्किकशिरोमणिविरचितदीधित्या च गर्भिता । ३

(४५) शास्त्रदीपिका । श्रीपार्थसारथिमिश्र प्रणीता । रामकृष्णविरचितयुक्तिस्नेहप्रपूरण्याख्यव्याख्यया सहिता तर्कपाद । ५

(४६) वैयाकरणसिद्धान्तलघुमञ्जूषा महामहोपाध्याय-श्रीनागेशभट्टविरचिता । श्रीमद्दुर्बलाचार्य बालम्भट्टाभ्यां विरचितकुञ्जिकाकलाख्यटीकाद्वयसंवलिता । ११

(४७) व्याकरणसिद्धान्तसुधानिधिः । पर्वतीय विश्वेश्वरसूरिविरचितः । ८

(४८) विरमित्रोदयः । लक्षणप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ७

(४९) बृहदारण्यकवार्तिकसार श्रीमद्विद्यारण्यस्वामिविरचितः । महेश्वरतीर्थकृतयाल्लघुसंग्रहाख्यया टीकया समलंकृतः । ६

(५०) वीरमित्रोदयः । राजनीतिप्रकाशः । महामहोपाध्यायश्रीमित्रमिश्रविरचितः । ५

(५१) पूर्वमीमांसा अधिकरणकौमुदी । श्रीमन्महामहोपाध्याय पं० रामकृष्णभट्टाचार्यविरचिता परिशिष्टाधिकरणनिरूपणपूर्वकं टिप्पण्या परिष्कृत । १

(५२) प्रशस्तपादभाष्यटीकासंग्रहः । तत्र कणादरहस्यम् । श्रीशङ्करमिश्रविरचितम् १

(५३) क्रमदीपिका । श्रीमन्महामहोपाध्याय काश्मीरिककेशवभट्टविरचिता । विद्याविनोदश्रीगोविन्दभट्टाचार्यकृतविवरणोपेत २

(५४) वीरमित्रोदयः । तीर्थप्रकाशः । महामहोपाध्याय श्रीमित्रमिश्रविरचितः । ६

(५५) सांख्यसंग्रहः । तत्र सांख्यतत्त्वविवेचनम् श्रीषिमानन्द (क्षेमेन्द्र) विरचितम् । सांख्यतत्त्वयाथार्थ्यदीपनम् भावागणेशविरचितम् । समाससूत्रव्याख्या सर्वोपकारिणी च । २

(५६) न्यायपरिशुद्धिः । श्रीमद्वेङ्कटनाथ श्रीवेदान्ताचार्यप्रसादिता । श्रीनिवासाचार्यविरचित न्यायसारसमाख्यया टीकया युत । २

प्रश्नादिप्रेषणस्थानम् } हरिदासगुप्तः, चौखम्बा बनारस सिटी